दिनांक	सदस्य संख्या	दिनांक	सदस्य संख्या


890,7
45425H

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1343.

सदुक्तिकर्णामृतम् ।

श्रीधरदासप्रणीतम् ।

श्रीरामावतारशर्म्मणा संस्कृतम् ।



SADUKTIKARNAMRITA.

BY

ŚRIDHARA DAŚA.

EDITED BY

RĀMĀVATĀRA S'ARMĀ, M. A.

FASCICULUS I.

Calcutta.

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS

5, Nandakumar Chawdhury's 2nd Lane.

AND PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.

1912.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH, 11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

	Rs.	
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	1	14
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-5 ; Vol. III, ...	14	6
Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	2	0
Aitereya Lochana.	2	0
Amarkosha, Fasc. 1	2	8
*Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each	1	4
Anumana Didhiti Prasarini, Fasc. 1 @ /10/-	3	12
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	0	10
Atmatattaviveka, Fasc. I.	3	2
Açvavaidyaka, Fasc. 1-5 @ /10/ each		
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-10 ; Vol. II. ...	20	0
Fasc. 1-10 @ 1/ each	1	14
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol II, Fasc. 1 @ /10/ each	5	0
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fasc 1-5 @ /10/ each ...	0	10
Bhāsavritty	4	6
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-6 ; Vol. 2, Fasc. 1, @ /10 each ...	2	0
Bauddhastotrasangraha	2	8
Bṛhaddēvatā Fasc. 1-4 @ /10/ each	3	12
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each	3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-6 @ /10/ each	1	14
Cri Cantinatha Charita, Fasc. 1-3	1	4
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	8	0
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each		
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-5, Vol. III,		
Fasc. 1-7 Vol. V, Fasc. 1-4 @ /10/ each	14	6
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each	3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/	3	2
Ditto Vol. IX, Fasc. 1-2	1	4
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1-17 @ /10/ each	10	10
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25 ; Vol. III. Part I,		
Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc. 1-6 @ /10/ each ...	36	14
Ditto Vol. IV, Fasc. 7-8, @ 1/4/ each	2	8
Ditto Vol. IV, Fasc. 9-10 @ /10/	1	4
Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each	8	12
*Çrauta-Sūtra of Çāṅkhāyana, Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-4 ;		
Vol. III, Fasc. 1-4 ; Vol 4, Fasc. 1 @ /10/ each	10	0
Çri Bhāshyam, Fasc. 1-3 @ /10/ each	1	14
Dāna Kriyā Kaumudī, Fasc. 1-2 @ /10/ each	1	4
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each	4	6
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each	3	[illegible]
Gobhiliya Grihya Sutra, Vol. I. @ /10/ each		
Ditto Vol. II. Fasc. 1-2 @ 1/4/ each		
Ditto (Appendix) Gobhila Parisista		
Ditto Grihya Sangraha		
Haralata		
Karmapradiph, Fasc. I		
Kāla Viveka, Fasc. 1-7 @ /10/ each		
Kātantra, Fasc. 1-6 @ /12/ each		
*Kūrma Purāṇa, Fasc. 3-9 @ /10/ each		
Kiranavali, Fasc. 1-2 @ /10/ each		
Madana Pārijāta, Fasc. 1-11 @ /10/ each		
Mahā-bhāṣya-pradīpōdyōta, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1-12 Vol. III,		
Fasc. 1-10 @ /10/ each		
Ditto Vol. IV, fasc. 1 @ 1/4		
Manuṭīkā Sangraha, Fasc. 1-3 @ /10/ each		
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each		
*Mīmāṃsā Darçana, Fasc. 10-19 @ /10/ each		
*Mugdhabodha Vyakarana, Fasc. 1-4 @ /10/ each ...		

सदुक्तिकर्णामृतम् ।

मङ्गलम् ।

प्रज्ञां कामपि सम्पदं च कुरुते यत्पादसंवाहनं
नित्यं शाम्यति विष्वगन्धतमसं यच्चक्षुरुन्मीलनात् ।
यत्पादार्घपयो विधूय दुरितं निःश्रेयसं यच्छति
स्वान्ते नः स वसत्वनारतमनाख्येयस्वरूपो हरिः ॥ १ ॥

प्रस्तावः ।

शौर्याणीव तपांसि बिभ्रति भवं यस्मिन्न यस्यावधि-
र्ज्ञाने दान इव द्विषामिव जयो येनेन्द्रियाणां कृतः ।
सम्राजामिव योगिनामपि गुरुर्यस्य क्षमामण्डले
स श्रीलक्ष्मणसेन एकनृपतिर्मुक्तस्य जीवन्नभूत् ॥ १ ॥
तस्यासीत्प्रतिराजतद्धृतमहासामन्तचूडामणि
नाम्ना श्रीवटुदास इत्यनुपमप्रेमैकपात्रं सखा
तापं सन्तमसं हरन्नहरहः कीर्त्तिं दधत्कौमुदी
साक्षादक्षयसूनृतामृतमयः पूर्णः कलानां निधिः ॥ २ ॥

श्रीमान् श्रीधरदास इत्यधिगुणाधारः स तस्मादभू-
दाकौमारमपारपौरुषपराधीनस्य यस्यानिशम् ।
लक्ष्मीर्वेदविदां गृहेषु गुणिता गोष्ठीषु विद्यावतां
भक्तिः श्रीपतिपादपल्लवनखज्योत्स्नासु विश्राम्यति ॥ ३ ॥
प्रत्येकं विषयेषु पञ्चकमितैः श्लोकैः कवीनामिदं
तेनाकारणबान्धवेन विदधे श्रीसूक्तिकर्णामृतम् ।
प्रीतिं पल्लवयन्तु कर्णकलसीमापूरयन्तश्चिरं
मज्जन्तः परिशीलयन्तु रसिकाः पञ्च प्रवाहानिह ॥ ४ ॥
अमराः शृङ्गारचटू अपदेशोच्चावचे अपि क्रमशः ।
इति पञ्चभिः प्रवाहैः सदुक्तिकर्णामृतं क्रियते ॥ ५ ॥

अमरप्रवाहवीचयः ।

अथ धाता रविरीशप्रणति-महादेव-शिव-हरक्रीड़ाः ।
प्रश्नोत्तराट्टहासावमुष्य मूर्द्धोत्तमाङ्गगङ्गा च ॥ १॥
मौलिशशी कोटीरो मुण्डावलिरचि पुरभिदारम्भः ।
बाणानलोष्टमूर्त्ति भैरव-हरताण्डवारम्भौ ॥ २ ॥
नृत्यं हरप्रसादनमथ गौरी परिणयस्थगौरी च ।
शृङ्गारो गिरिदुहितुर्दुर्गा काली तथार्द्धनारीशः ॥ ३ ॥
शृङ्गारी च गजानन-शरसम्भव-भृङ्गिणः प्रमथाः ।
अथ हरिहरौ सकान्तौ सुरसिन्धुर्जह्नुकन्यकाशंसा ॥ ४ ॥

श्रीमत्स्य-कमठ-सूकर-केशरि-नरसिंहपाणिजन्मानः ।
शृङ्गारी च नृसिंहो वामनमूर्त्तिस्त्रिविक्रमो भृगुजः ॥ ५ ॥
दाशरथिरेष विरही हलधर-जिन-कल्किनोथ कृष्णस्य ।
शिशुता-कुमारभावौ स्वप्नायित-यौवन-क्रीड़ाः ॥ ६ ॥
प्रश्नोत्तरं च वेणुध्वननं गीतं भुजश्च गिरिधरणम् ।
उत्कण्ठा गोपवधूसन्देशो हरिरसुष्च भक्तिश्च ॥ ७ ॥
उदधिमथनहरिरम्बुधिमथनोत्थश्रीः स्वयंवरो लक्ष्म्याः ।
श्रीशृङ्गारः कमला कमलोपालम्भवाक् प्रशस्तेन्दुः ॥ ८ ॥
चन्द्रकला शशिबिम्बं प्रौढ़विधुः सरुचिचन्द्रमा रश्मिः ।
ज्योत्स्ना कलङ्क-तम-उडु-कैरवसहितेन्दु-भासश्च ॥ ९ ॥
मिश्रबहुरूपकास्तंगतबहुविषयेन्द्वोथ गन्धवहः ।
दक्षिण-नदी-समुद्र-प्रभातभिन्नश्च पुष्पधन्वा च ॥ १० ॥
स्मरशौर्यमथोच्चावचमिति पञ्चोपेतनवतिवीचीभिः ।
श्रीधरदासेन कृतः कृतिना देवप्रवाहोऽयम् ॥ ११ ॥

देवप्रवाहः ।

अथ ब्रह्मवीचिः ।

शम्भोः साक्षात्सखैकः सुरपतिरपरो धर्म्मराजस्तथान्यः
प्राणा विश्वस्य कस्य प्रथमतरमतः कोनु सम्भाषणीयः ।
कार्यायातान्विदित्वा मुहुरिति चतुरो लोकपालांश्चतुर्भि-
र्वक्त्रैराभाषमाणः सममुदितरवः पातु पद्मोद्भवो वः ॥ १ ॥

पालितस्य ।

आगस्कारिणि कालनेमिदमने तत्ताड़नार्थं क्रुधा
नाभीपङ्कजमस्तुतां गमयितुं जाते प्रयत्ने श्रियः ।
आवासोन्मथनोपपादितभयभ्रान्तात्मनः सम्भ्रमा-
दब्रह्मण्यपराः पुरातनमुनेर्वाचः प्रसीदन्तु वः ॥ २ ॥

भट्टश्रीनिवासस्य ।

पायाद्वो मधुकैटभासुरवधे विष्णुप्रबोधोद्धुरो
धाता वक्त्रचतुष्टयं तु युगपद्यस्याभवत्सार्थकम् ।
एकं स्तौति मुखं शिवामितरदप्यार्तं वरान् याचते
दैत्यौ प्रत्यपरं वितर्जति हरत्यन्यच्छ्रियः सम्भ्रमम् ॥ ३ ॥

वसन्तदेवस्य ।

यन्न क्षुण्णं कदाचित्तुहिनकणचयस्यन्दिभिश्चन्द्रपादै-
र्नापि व्यालीनमुक्तैर्नवनलिनसरोबन्धुभिर्भानवीयैः ।
तत्कल्पान्तानुषङ्गि द्रुतमतनुतमः पाटयन्त्यः समन्ता-
दायाधीतौ विधातुर्मुखग्रशिविसृताः पान्तु वो दन्तभासः ॥ ४ ॥

बीजकस्य ।

जातस्तेऽधरखण्डनात्परिभवः कापालिकादस्य यः ।
स ब्रह्मादिषु कथ्यतामिति मुहुर्वाणीं गुहे जल्पति ।
गौरीं हस्तयुगेन षण्मुखवचो रोद्धुं निरीक्ष्याक्षमां
वैलक्ष्याच्चतुरास्यनिष्फलपरावृत्तिश्चिरं पातु वः ॥ ५ ॥

कस्यचित् ।

---

२ सूर्य्यः ।

तुङ्गोदयाद्रिभुजगेन्द्रफणोपलाय
व्योमेन्द्रनीलतरुकाञ्चनपल्लवाय ।
संसारसागरसमुत्क्रमियोगिसार्थ-
प्रस्थानपूर्णकलसाय नमः सवित्रे ॥ १ ॥

वराहमिहिरस्य ।

विश्वग्विसारितिमिरप्रकरावरुद्ध-
त्रैलोक्यनेत्रपुटसिद्धरसायनाय ।
तुभ्यं नमः कमलषण्डविषादनिद्रा-
विद्रावणोद्यतकराय दिवाकराय ॥ २ ॥

श्रीकण्ठस्य ।

शुकतुण्डच्छवि सवितुश्चण्डरुचः पुण्डरीकवनबन्धोः ।
मण्डलमुदितं वन्दे कुण्डलमाखण्डलाशायाः ॥ ३ ॥

विद्यायाः ।

जीयादेकफलं नभस्तलतरोरभ्रंशिसिन्दूरिणी
मुद्रा कैरवकाननस्य तिमिरस्तेयाय सन्धिर्दिवः ।
मन्दारस्तवकोत्तरीयकबरीभारस्य गौरीपतेः
कम्पिल्लच्छदपाटलच्छवि कुलच्छत्रं वधूनां रविः ॥ ४ ॥

हरेः ।

आद्यूनस्तमसां चकोररमणीरागाब्धिमन्थाचलो
जीवातुर्जलजस्य वासवदिशाशैलेन्द्रचूडामणिः ।
आदिष्टा स्रुतिकर्मणां कुमुदिनीशोकाग्निपूर्णाहुति-
र्देवः सोमरसायनं विजयते विश्वस्य बीजं रविः ॥ ५ ॥

विभाकरस्य ।

---

३ ईशप्रणतिः ।

मौलौ वेगादुदञ्चत्यपि चरणभरन्यञ्चदुर्वीतलत्वा-
दञ्चुसस्वर्गलोकक्षितिमुदितसुरश्रेष्ठगोष्ठीस्तुताय ।
सन्त्रासाद्रिःसरन्त्याप्यविरतविषजद्दचिणार्द्धाङ्गबन्धा-
दत्यक्तायाद्रिपुत्र्या त्रिपुरहर जगत्क्लेशहर्त्रे नमस्ते ॥ १ ॥

बाणस्य ।

नमस्तुङ्गशिरश्चुम्बि-चन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भ-मूलस्तम्भाय शम्भवे ॥ २ ॥

तस्यैव ।

तादृक्सप्तसमुद्रमुद्रितमहीभूषड्भिरभ्रंकषै-
स्तावद्भिः परिवारिता पृथुपृथुद्वीपैः समन्तादियम् ।
यस्य स्फारफणामणौ निलयनात्तिर्यक्कलङ्काकृतिः
शेषः सोप्यगमद्यदङ्गदपदं तस्मै नमः शम्भवे ॥ ३ ॥

वल्लनस्य ।

नमस्तस्मै कस्मै चन वचनचित्तेन्द्रिययमी
यमीशानं ज्योतिर्मयमयमुपास्ते मुनिजनः ।
गुरूपन्नप्रज्ञामुकुरनिकुरम्बप्रतिफल-
न्निजानन्दज्योत्स्नाभ्युदयभिदुराज्ञानतिमिरः ॥ ४ ॥

हरेः ।

वृषधन धनदप्रिय प्रियार्द्ध-ग्रथनविदग्ध विदग्धचित्तयोने ।
पुरहर हरिणाङ्कचूड़ चूड़ाभुजगभयङ्कर धूर्जटे नमस्ते ॥ ५ ॥

भोजदेवस्य ।

---

४ महादेवः ।

शिल्पं त्रीणि जगन्ति यस्य कविता यस्य त्रिवेदी गुरो-
र्यश्चक्रे त्रिपुरव्ययं त्रिपथगा यन्मूर्ध्नि माल्यायते ।
त्रीन् कालानिव वीक्षितुं वहति यो विस्फूर्जदक्षित्रयं
स त्रैगुण्यपरिच्छदो विजयते देवस्त्रिशूलायुधः ॥ १ ॥

वसुकल्पदत्तस्य ।

अर्वाञ्चत्पञ्चशाखः स्फुरदुपरिजटामण्डलः संश्रितानां
नित्यापर्णोऽपि तापत्रितयमपनयन् स्थाणुरव्यादपूर्वः ।
यः प्रोन्मीलत्कपर्दैः शिरसि विरचितावालबन्धे द्युसिन्धोः
पाथोभिर्लब्धसेकः फलति फलशतं वाञ्छितं भक्तिभाजाम् ॥ २ ॥

जह्नोः ।

कामं मा कामयध्वं वृषमपि च भृशं माद्रियध्वं न वित्ते
चित्तं दत्त श्रयध्वं परममृतफला या कला तामिहैकाम् ।
इत्थं देवः स्मरारिर्वृषमधरचरीकृत्य मूर्त्यैव दिक्स-
न्निःस्वो विश्वोपदेशानमृतकरकलाशेखरस्त्रायतां वः ॥ ३ ॥

कविपण्डितश्रीहर्षस्य ।

भूतिव्याजेन भूमीममरपुरसरिच्छीतवादम्बु बिभ्र-
ल्ललाटाच्चिच्छलेन ज्वलनमहिपतिश्वाससंचात्समीरम् ।
विस्तीर्णाघोरवक्त्रोदरकुहरनिभेनाम्बरं पञ्चभूतै-
र्विश्वं शश्वद्दितन्वन्वितरतु भवतः सम्मदं चन्द्रमौलिः ॥ ४ ॥

जयदेवस्य ।

पीयूषेण विषेण तुल्यमशनं स्वर्गे श्मशाने स्थिति-
र्निर्भेदा पयसोऽनलस्य वहने यस्याविशेषग्रहः ।
ऐश्वर्येण च भिक्षया च गमयन् कालं समः सर्वतो
देवः स्वात्मनि कौतुकी हरतु वः संसारपाशं हरः ॥ ५ ॥

वैद्यगदाधरस्य ।

---

५ शिवः ।

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ॥ १ ॥

कालिदासस्य ।

कण्ठच्छायमिषेण कल्परजनीमुक्तंसमन्दाकिनी-
रूपेण प्रलयाब्धिमूर्ध्वनयनव्याजेन कल्पानलम् ।
भूषापन्नगकेलिपानकपटादेकोनपञ्चाशतं
वातानप्युपसंहरन्नवतु वः कल्पान्तशान्तौ शिवः ॥ २ ॥

चित्तपस्य ।

क्वाप्यग्निः क्वचिदद्रिभूर्नरशिरःकीर्णा क्वचिन्निम्नगा
रूचा क्वापि जटा क्वचिद्विषधरा रौद्रं विषं कुत्रचित् ।
तादृग्भूतगणैर्वृतो मम चिताभस्मोर्मिकिर्मीरितः
संसारं प्रतिमुच्य यातुरपुनर्योगाय पन्थाः शिवः ॥ ३ ॥

विज्ञपस्य ।

निर्माता जगदर्थमेव वचसां वाचंयमो यः स्वयं
भोगान्विश्वकृते तनोति विषयव्यावर्त्तितात्मेन्द्रियः ।
धत्तेस्त्राणि जगन्ति रचितुमुदासीनः स्वदेहग्रहे
योगीन्द्रोस्तु सदाशिवः स भवतां भूत्यै परार्थव्रती ॥ ४ ॥

वैद्यगदाधरस्य ।

दूरोन्मुक्तखगेश्वरे मुरभिदि व्याचिम्नबाहौ ग्रह-
व्यूहे वारितमातरिश्वनि नमत्याशापतीनां गणे ।
निष्कम्पोरगहारवन्निरचलचूडेन्दुरव्याकुल-
स्वःसिन्धुः स्थिरयोगनिर्वृतमना: पायात्त्रिलोकीं शिवः ॥ ५ ॥

तस्यैव ।

२

हरशृङ्गारः ।

एवं स्थापय सुभ्रु बाहुलतिकामेवं कुरु स्थानकं
नात्युच्चैर्नम कुञ्चिताग्रचरणं मां पश्य तावत्क्षणम् ।
गौरीं नर्तयतः स्ववक्त्रमुरजेनाम्भोधरध्वानिना
शम्भोर्वः सुखयन्तु लम्भितलयच्छेदाहतास्तालिकाः ॥ १ ॥

योगेश्वरस्य ।

तस्या नाम मया कथं कथमपि भ्रान्त्या समुच्चारितं
जानास्येव ममाशयं तव कृते गौरि प्रसन्ना भव ।
क्षान्तिः स्वीक्रियतां दयावति मयि क्रोधः परित्यज्यता-
मित्येवं बहु जल्पतः स्मररिपोः प्रेमाञ्जलिः पातु वः ॥ २ ॥

चक्रपाणेः ।

बालः सुन्दरि चन्द्रमाः स्रुतसुधाधाराभिराप्यायितो
निद्रामेति फणीश्वरः सुरधुनी रुद्धा जटामण्डले ।
इत्थं मन्मथकेलिकौतुकविधौ व्रीडावतीं पार्वतीं
पायाद्वः प्रतिबोधयन्नववधूं चन्द्रार्धचूडामणिः ॥ ३ ॥

कक्कोलस्य ।

श्रुतिः सक्ता मुग्धे वचसि वदनेन्दौ निपतिता-
दृशः स्वादौ बिम्बाधरमधुनि मग्नैव रसना ।
निषण्णा भ्रूर्नासा निजपरिमले शैलदुहितु-
र्घनाश्लेषानन्दे वपुरपि विलीनं पुरभिदः ॥ ४ ॥

उमापतिधरस्य ।

दूरे दारुवनाभिसारक मृषा चाटूनि मुञ्चाधुना
भूयस्त्वं पुनरप्यहं यदि तदा चन्द्रः चितिं यास्यति।
इत्युक्तः शशिमौलिरद्रिसुतया चूड़ेन्दुभूलम्भन-
व्याजव्यञ्जितपादपद्मपतनप्रीतप्रियः पातु वः ॥ ५ ॥

कविपण्डितश्रीहर्षस्य।

शिवयोः प्रश्नोत्तरम्।

कस्मात्पार्वति निष्ठुरासि सहजं शैलोद्भवानामिदं
निःस्नेहासि कुतो न भस्मपरुषः स्नेहं क्वचिद्विन्दति।
कोपस्ते मयि निष्फलः प्रियतमे स्थाणौ फलं किं भवे-
दित्थं निर्वचनीकृतो दयितया शम्भुः शिवायास्तु वः ॥ १ ॥

भोजदेवस्य।

किं गौरि मां प्रति रुषा ननु गौरहं किं
कुप्यामि कं प्रति मयीत्यनुमानतोऽहम्।
जानामि सत्यमनुमानत एव स त्व-
मित्थं गिरौ गिरिभुवः कुटिला जयन्ति ॥ २ ॥

रुद्रस्य।

केयं मूर्ध्न्यन्धकारे तिमिरमिह कुतः सुभ्रु कान्तेन्दुयुक्ते
कान्ताप्यन्यैव कामिन्ननु जलसुमया पृष्टमेतावदेव।
नाहं द्वन्द्वं करोमि व्यपनय शिरसस्तूर्णमेनामिदानी-
मेवं प्रोक्तो भवान्या प्रतिवचनजड़ः पातु वो मन्मथारिः॥ ३ ॥

कस्यचित्।

एषा ते हर का सुगात्रि कतमा मूर्ध्नि स्थिता किं जटा
हंसः किं भजते जटां न हि शशी चन्द्रो जलं सेवते ।
मुग्धे भूतिरियं कुतोऽत्र सलिलं भूतिस्तरङ्गायते
इत्थं यो विनिगूहते त्रिपथगां पायात्स वः शङ्करः ॥ ४ ॥

कस्यचित् ।

धन्या केयं स्थिता ते शिरसि शशिकला किं नु नामैतदस्या
नामैवास्यास्तदेतत्परिचितमपि ते विस्मृतं कस्य हेतोः ।
नारीं पृच्छामि नेन्दुं कथयतु विजया न प्रमाणं यदीन्दु-
र्देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः ॥५॥

विशाखदत्तस्य ।

---

८ हरहास्यम् ।

पाणौ कङ्कणमुत्फणः फणिपतिर्नेत्रं ज्वलत्पावकं
कण्ठः कुण्ठितकालकूटजटिलो वस्त्रं गजेन्द्राजिनम् ।
गौरीलोचनलोभनाय सुभगो वेशो वरस्येति मे
गण्डोल्लासविभावितः पशुपतेर्हास्योद्गमः पातु वः ॥ १ ॥

रुद्रस्य ।

उद्दामदन्तरुचिपल्लवितार्धचन्द्र-
ज्योत्स्नानिपीततिमिरप्रकरावरोधः ।
श्रेयांसि वो दिशतु ताण्डवितस्य शम्भो-
रम्भोधरावलिघनध्वनिरट्टहासः ॥ २ ॥

सङ्घमित्रस्य ।

मातर्ब्रूहि किमेतदञ्जलिपुटे तातेन गोपायितं
वत्स स्वादु फलं प्रयच्छसि न मे गत्वा गृहाण स्वयम्।
मात्रैवं प्रहिते गुहे विघटयत्याकृष्य सन्ध्याञ्जलिं
शम्भोर्भग्नसमाधिरुद्धमनसो हास्योद्गमः पातु वः॥ ३॥

योगेश्वरस्य।

निर्विघ्नं घनसारसारविशदस्वर्लोककल्लोलिनी-
कल्लोलप्रतिमल्लबाहुचलनैर्व्योमान्तरालश्रियः।
शम्भोः सम्भवदङ्गहारतरलोत्तंसामृतांशुद्रव-
प्राणत्राणिकपालचापलहृशो हासोर्मयः पान्तु वः॥ ४॥

वाचस्पतेः।

भृङ्गी कस्तव चर्चिके गुह न कोऽप्याकार एकस्तु नौ
सत्यं भृङ्गिरिटे सुसत्यमनृतं लोकं तु मोटिर्वदेत्।
नग्नं पृच्छतमस्तु वां परिणयैकात्मत्वमित्युद्गट-
स्तावुत्सृज्य सपर्षदः पशुपतेर्हास्योद्गमः पातु वः॥ ५॥

शतानन्दस्य।

---

६ हरशिरः।

त्वङ्गद्गङ्गमुदञ्चदिन्दुशकलं भ्रश्यत्कपालावलि-
क्रीड़भ्राम्यदमन्दमारुतचयस्फारीभवद्भांकृति।
पायाद्वो घनताण्डवव्यतिकरप्राग्भारखेदस्खल-
द्भोगीन्द्रश्लथपिङ्गलोत्कटजटाजूटं शिरो धूर्जटेः॥ १॥

वीर्यमित्रस्य।

सन्ध्याताण्डवितस्य खण्डपरशोरव्याज्जगन्ति ज्वल-
ल्लालाटाक्षिपुटोद्भवानलशिखालीढेन्दुलेखं शिरः ।
भ्रश्यत्कृत्ति चलन्महाहि विगलद्व्योमापगाम्बु स्खल-
त्खण्डेन्दुच्छलदच्छभूति चटुलभ्राम्यज्जटासन्तति ॥ २ ॥

योगेश्वरस्य ।

धूमोद्भेदानभिज्ञस्फुरदनलमनाघ्रातपङ्काधिकार-
प्रेङ्खत्कल्लोलवारिव्यतिकरमनघस्पर्शजाग्रत्कपालम् ।
अज्ञातास्तत्रियामादयितमविदितप्राणिहिंसोरगस्र-
ग्भूतीशस्य प्रभूताद्भुतमवतु शिरः श्रेयसां सन्ततिं वः ॥ ३ ॥

वैद्यगदाधरस्य ।

नाट्यावेगविनिःसृतत्रिपथगावारिप्रवाहाकुलः
शीघ्रभ्रान्तिवशाल्ललाटनयनज्वालातडिद्भीषणः ।
मुण्डालीकुहरप्रसर्पदनिलास्फालप्रयुक्तध्वनिः
प्रावृट्काल इवोदितः शिवशिरोमेघः शिवायास्तु वः ॥ ४॥

कस्यचित् ।

अन्तःस्वीकृतजाह्नवीजलमतिस्वच्छन्दरत्नाङ्कुर-
श्रेणीशोणभुजङ्गनायकफणाचन्द्रोल्लसत्पल्लवम् ।
भूयादभ्युदयाय मोक्षनगरप्रस्थानभाजामितः
प्रत्यूहप्रशमैकपूर्णकलशप्रायं शिरो धूर्जटेः ॥ ५ ॥

जलचन्द्रस्य ।

---

१० हरशिरोगङ्गा ।

कपाले गम्भीरः कुहरिणि जटासन्धिषु कृशः ।
समुत्तानश्चूड़ाभुजगमणिबन्धव्यतिकरे ।
मृदुर्लेखाकोणे रयवशविलोलस्य शशिनः
पुनीताद्दीर्घं वो हरशिरसि गङ्गाकलकलः ॥ १ ॥

योगेश्वरस्य ।

स जयति गाङ्गतरङ्गः शम्भोरुत्तुङ्गमौलिविनिविष्टः ।
मज्जति पुनरुन्मज्जति चन्द्रकला यत्र शफरीव ॥ २ ॥

कस्यचित् ।

यच्चन्द्रकोटिकरकोरकभावभाजि
बभ्राम बभ्रुणि जटापटले हरस्य ।
तद्वः पुनातु हिमशैलशिलानिकुञ्ज-
साल्कारडम्बरविरावि सुरापगाम्भः ॥ ३ ॥

कस्यचित् ।

गौरीविभज्यमानार्द्ध-सङ्कीर्णे हरमूर्द्धनि ।
अम्ब द्विगुणगम्भीरे भागीरथि नमोऽस्तु ते ॥ ४ ॥

कस्यचित् ।

मुक्ताभा नृकपालशुक्तिषु जटावल्लीषु मल्लीनिभा-
वह्नौ लाजनिभा दृशोर्मणिनिभा भोगोत्करे भोगिनः ।
नृत्यावर्तपरम्परेरितपयःसंमूर्च्छनोच्छालिताः
खेलन्तो हरमूर्ध्नि पान्तु भवतो गङ्गापयोविन्दवः ॥ ५ ॥

नटगाङ्गोकस्य ।

हरशिरश्चन्द्रः ।

स वः पायादिन्दुर्नवबिसलताकोटिकुटिलः
स्मरारेर्यो मूर्ध्नि ज्वलनकपिशे भाति निहितः ।
स्रवन्मन्दाकिन्याः प्रतिदिवससिक्तेन पयसा
कपालेनोन्मुक्तः स्फटिकधवलेनाङ्कुर इव ॥ १ ॥

राजशेखरस्य ।

व्यलीके पार्वत्याः परिलघुलवैरञ्जनजुषः
पतद्भिर्बाष्पस्य क्रमलिखितलक्ष्मा विजयते ।
लसल्लीलाचन्द्रश्चरणगतमौलेः स्मरजितः
किरद्भिः स्वज्योत्स्नानखमणिभिरापूरितकणः ॥ २ ॥

वामनस्य ।

शम्भोरिन्दुकला शिवं दिशतु वो यस्याः प्रतिच्छायिकां
विस्रोतःपतितामनेककुटिलीभावं गतां वीचिभिः ।
सेनानीरवलोकते ध्वजपटाकूतेन कात्यायनी
मल्लीदामसमीहया निजवधूबोधेन नागाधिपः ॥ ३ ॥

उमापतेः ।

अमुद्रकुमुदत्विषः स्फुटितफेनलक्ष्मीस्पृशो-
मरालकुलविभ्रमाः शफरफाललीलामृतः ।
जयन्ति गिरिजापतेस्तरलमौलिमन्दाकिनी-
तरङ्गचयचुम्बिनस्तुहिनदीधितेरंशवः ॥ ४ ॥

उमापतिधरस्य ।

च्युतामिन्दोर्लेखां रतिकलहभग्नं च वलयं
द्वयं चक्रीकृत्य प्रहसितमुखी शैलतनया ।
अवोचद्यं पश्येत्यवतु स शिवः सा च गिरिजा
स च क्रीडाचन्द्रो दशनकिरणापूरितकलः ॥ ५ ॥

वररुचेः ।

---

१२ हरजटा ।

ज्वालेवोर्ध्वविसर्पिणी परिणतस्यान्तस्तपस्तेजसो
गङ्गातोयतरङ्गसर्पवसतिर्वल्मीकलक्ष्मीरिव ।
सन्ध्येवार्द्रमृणालकोमलतनोरिन्दोः सहस्थायिनी
पायाद्वस्तरुणारुणांशुकपिला शम्भोर्जटासंहतिः ॥ १॥

रविनागस्य ।

चूडापीडनिबद्धवासुकिफणाफूत्कारनिर्यद्विष-
ज्वालाजृम्भितमत्स्यकच्छपवधूलीढेन्दुलेखामृतम् ।
अव्याद्वः स्मरसूदनस्य मदनक्रीडाकचाकर्षण-
स्रोतन्नाकसरित्सरोषगिरिजादृष्टं जटामण्डलम् ॥ २ ॥

भवभूतेः ।

क्वचिदमरसरित्क्वचित्कपालं क्वचिदुरगाः क्वचिदैन्दवी च लेखा ।
इति विषमविभूषणैरुपेता प्रमथपतेरवताज्जटाटवी वः ॥ ३ ॥

दण्डिनः ।

उत्पन्नेव दृशोऽर्चिषा कुसुमितेवेन्दोः करैर्भोगिभिः
सारोहेव जटाटवी फलतु वः श्रेयो भवानीपतेः ।
यत्पर्यन्तविवर्तिनः सुरसरित्पूरस्य भूरिस्फुर-
त्फेनोद्रेकविलासमञ्चति विधेर्जीर्णा कपालावली ॥ ४ ॥

उमापतिधरस्य ।

मूलानवद्धभुजगेन्द्रकृतालवाल-
बन्धाः स्खलत्त्रिदशसिन्धुजलौघसिक्ताः ।
उन्मुक्तचन्द्रकुसुमा जगतां हिताय
शम्भोर्जटाः कनककल्पलताः फलन्तु ॥ ५ ॥

---

१३ हरकपालः ।

शान्त्यै वोऽस्तु कपालदाम जगतां पत्युर्यदीयां लिपिं
क्वापि क्वापि गणाः पठन्ति पदशो नातिप्रसिद्धाक्षराम् ।
विश्वं स्रक्ष्यति वक्ष्यति क्षितिमपामीशिष्यते ऽशिष्यते
नागान्नागिषु रंस्यते स्यति जगन्निर्वक्ष्यति द्यामिति ॥ १ ॥

कस्यचित् ।

गाढग्रन्थिप्रफुल्लद्गलविकलफणापीठनिर्यद्विषाग्नि-
ज्वालानिष्टप्तचन्द्रद्रवदमृतरसप्रोषितप्रेतभावाः ।
उज्जृम्भा बभ्रुनेत्रद्युतिमसकृदसृक्तृष्णयालोकयन्त्यः
पान्तु त्वां नागनालग्रथितशवशिरःश्रेणयो भैरवस्य ॥ २ ॥

भवभूतेः ।

जयति भुजगरज्जुग्रन्थिनिष्पीड़ितेन्दु-
स्रवदमृतनिवृत्तप्रेतभावैः कपालैः ।
विरचितनुतिबन्धो मूर्ध्नि सद्यः पुरारेः
परिणतबहुकल्पब्रह्मणां ब्रह्मघोषः ॥ ३ ॥

कस्यचित् ।

लिप्ता लालाटनेत्रस्फुरदुरुदहनज्वालजालप्रतापो-
त्ताम्यत्कोटीरभारस्थिरशशिशकलप्रस्रुताभिः सुधाभिः ।
अन्तर्नृत्यप्रमोदप्रचलितशिरसश्चन्द्रमौलेः कपालाः
कल्याणं वः क्रियासुः स्तुतिमभिदधतस्ताण्डवाडम्बरेषु ॥ ४ ॥

नरसिंहस्य ।

पायाद्वः स शिरांसि ताण्डवविधौ यन्मूर्ध्नि खिन्नोरग-
श्वासाग्निद्रुतचूडचन्द्रसुधया प्राणन्त्यकस्माद्विभेः ।
ऋक्सामे कतिचित्पठन्ति कतिचिन्मज्जन्ति गङ्गाजले
स्वात्मानं कतिचिन्मनन्ति कतिचिन्नेत्रानले जुह्वति ॥ ५ ॥

वामदेवस्य ।

---

१४ हरनयनम् ।

धूमध्यामककुब्भि भूधरतटत्रुट्यद्दृषन्ति स्फुटा-
टोपोल्लुण्ठितसागराम्भि विफलव्यालोकभास्वन्ति च ।
दृप्यत्तूर्णमरुन्ति कातरतरभ्रश्यज्जगन्ति प्रभो-
रुद्यन्ति त्रिपुरान्तकृन्ति नयनादर्चींषि पुष्यन्तु वः ॥ १ ॥

कस्यचित् ।

यज्ज्योतिर्द्वादशार्कं हिमगिरिदुहितुर्यन्निशाकेलिदीपो
यत्कन्दर्पास्थिभस्मीकरणतरुणिताभ्यन्तरज्वाललेखम् ।
कल्पान्ते जुह्वतो यत्त्रिभुवनसमिधं वेधसः पुण्यवह्नि-
र्विभ्राणं बभ्रुकान्तिं त्रिनयननयनज्योतिरस्तु श्रिये वः ॥ २ ॥

अंशुधरस्य ।

आनन्दस्तिमिताः समाधिषु मुखे गौर्या विलासालसाः
सम्भ्रान्ताः क्षणमद्भुताः क्षणमथ स्मेरा निजे वैकृते ।
क्रूराः कृष्टशरासने मनसिजे दग्धे घृणाकूणिता-
स्तत्कान्तारुदितेऽश्रुपूरतरलाः शम्भोर्दृशः पान्तु वः ॥ ३ ॥

कस्यचित् ।

पक्ष्मालीपिङ्गलिम्नः कण इव तडितां यस्य कृत्स्नः समूहो
यस्मिन् ब्रह्माण्डमीषद्विघटितमुकुले कालयज्वा जुहाव ।
अर्चिर्निष्टप्तचूडाशशिगलितसुधासारसाङ्कारिकोणं
तार्तीयीकं पुरारेस्तदवतु मदनप्लोषणं लोचनं वः ॥ ४ ॥

भवभूतेः ।

एकं योगनियोजनान्मुकुलितं चक्षुर्द्वितीयं पुनः
पार्वत्या जघनस्थलस्तनतटे सम्भोगभावालसम् ।
अन्यद्दूरविकृष्टचापमदनक्रोधानलोद्दीपितं
शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः ॥ ५ ॥

श्रीहर्षदेवस्य ।

१५ त्रिपुरदाहारम्भः ।

संरब्धाङ्घ्रिनिवेशनादनिभृतं सर्वंसहाविग्रहे
वीतालम्बनमारसातलमधोविभ्रंशिनि स्यन्दने ।
याते दृक्पथदूरतां मयपुरे देवस्य भूतप्रभो-
र्द्राग्विश्वंभरबाणमोक्षविषयो यत्नः शिवायास्तु वः ॥ १ ॥

वैद्यगदाधरस्य ।

चापोत्क्षेपापसर्पद्वलयफणिगुणोत्तंसितापाङ्गभित्ति
प्रत्यालीढानुबन्धोच्छलितजलनिधिव्याप्तवेलोपकण्ठम् ।
उन्मीलज्ज्वालवह्निक्रमशिथिलजटाजूटगङ्गेन्दुलेखं
भूयाद्वश्चन्द्रमौलेर्मयनगरभिदः सौष्ठवं मङ्गलाय ॥ २ ॥

जलचन्द्रस्य ।

संव्यानांशुकपल्लवेषु तरलं वेणीगुणेषु स्थितं
मन्दं कञ्चुकसन्धिषु स्तनतटोत्सङ्गेषु दीप्तार्चिषम् ।
आलोक्य त्रिपुरावरोधनवधूवर्गस्य धूमध्वजं
हस्तस्रस्तशरासनो विजयते देवो दयार्द्रेक्षणः ॥ ३ ॥

मयूरस्य ।

वाणीभूतपुराणपूरुषधृतिप्रत्याशया धाविते
विद्रातीक्ष्णजाशुशुक्षणिकणक्लान्ते शकुन्तेश्वरे ।
नम्रोन्नम्रभुजङ्गपुङ्गवगुणव्याकृष्टबाणासन-
क्षिप्तास्त्रस्य पुरद्रुहो विजयते सन्धानसीमाश्रमः ॥ ४ ॥

मुरारेः ।

दृष्टः सप्रेमदेव्या किमिदमिति भयात्सम्भ्रमाच्चासुरीभिः
शान्तान्तस्तत्त्वसारैः सकरुणमृषिभिर्विष्णुना सस्मितेन ।
आकृष्यास्त्रं सगर्वैरुपशमितवधूसम्भ्रमैर्दैत्यवीरैः
सानन्दं देवताभिर्मयपुरदहने धूर्जटिः पातु युष्मान् ॥ ५ ॥

भट्टनारायणस्य ।

---

१६ हरबाणः ।

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण ।
आलिङ्गन्योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥ १ ॥

अमरुकस्य ।

सिन्दूरश्रीर्ललाटे कनकरसमयः कर्णपाशेऽवतंसो
वक्त्रे ताम्बूलरागः पृथुकुचकलसे कुङ्कुमस्यानुलेपः ।
दैत्याधीशाङ्गनानां जघनपरिसरे लाक्षिकक्षौमलक्ष्मी-
श्श्रेयांसि क्षिणोतु त्रिपुरहरशरोद्गारजन्मानलो वः ॥ २ ॥

मङ्गलस्य ।

विष्वग्व्याधूय धूमप्रचययवनिकां स्फायमानस्फुलिङ्ग-
व्याजादाकीर्य पुष्पाञ्जलिमुपरि पटं न्यस्यतो मन्दिराणाम् ।
स्वच्छन्दाभोगसीमा महति मयपुरे दत्तरौद्राङ्गराग-
व्याप्ताशेषस्य विश्वेश्वरशरशिखिनस्ताण्डवं नः पुनातु ॥ ३ ॥

वैद्यगदाधरस्य ।

वाष्पैर्वीताङ्गरागच्छविषु विरचयन्नच्छधूमच्छटाभिः
कस्तूरीपत्रमायां मयनगरवधूवर्गवक्षोरुहेषु ।
आसामम्लानपुष्पस्तवकनवकलामंशुभिः कुन्तलेषु
व्याकुर्वन्नन्धकारं हरतु हरशरोद्गारजन्मानलो वः ॥ ४ ॥

जलचन्द्रस्य ।

चापं मुष्टिर्भवान्याः सरसिजमुकुलश्रीः कथं वा विधत्ते
प्रत्यालीढं कथं वा रचयतु मणिमन्नूपुरो वामपादः ।
इत्थं यावद्वितर्कं विदधति विबुधास्तावदग्रे य आसी-
द्बाणाग्निः प्लुष्टदैत्यो मयपुरदहने धूर्जटेः सोऽवताद्वः ॥ ५ ॥

कस्यचित् ।

---

१७ अष्टमूर्तिः ।

पयोदानां पन्थाः कवलविषयो वा परिमलं
वहन् बिभ्राणो वा सुहृदपसुहृद्वा जलरुहाम् ।
ददद्धृह्लानो वा हविरिति मुहुर्यस्य विबुधाः
स्तुवन्त्यष्टौ मूर्तीः स जगदवतादन्धकरिपुः ॥ १ ॥

श्रीहनुमतः ।

दिक्कालात्मसमैव यस्य विभुता यस्तत्र विद्योतते
यत्रामुष्य सुधीभवन्ति किरणा राशेः स यासाममूत् ।
यस्तत्पित्तमुषःसु योऽस्य विषये यस्तस्य जीवातवे
वोढा यद्गुणमेष मन्मथरिपोस्ताः पान्तु वो मूर्तयः ॥ २ ॥

चित्तपस्य ।

मौलिं नैनेक्ति भालं तिलकयति तनोरङ्गरागं विधत्ते
धम्मिल्लं सन्दधाति प्रथयति शिरसि व्यक्तमुत्तंसलक्ष्मीम् ।
सम्प्रीणीते भुजङ्गानपनयति रसं वेत्ति संमोदमुद्रां
याभिः शृङ्गारबन्धस्तनुभिरिव शिवस्ताभिरस्तु श्रिये वः ॥३॥

जलचन्द्रस्य ।

यां धम्मिल्लपदेऽभिषिञ्चति यया सन्ध्यासु बद्धाञ्जलि-
र्यामायम्य यदात्मकानि नयनान्यामील्य यां ध्यायति ।
यां च स्यन्दनतां निनाय सहितस्ताभिः स्वयं मूर्तिभि-
र्देवो विश्वतनुः पुनातु स जगच्चन्द्रार्धचूड़ामणिः ॥ ४ ॥

सुधाकरस्य ।

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ ५ ॥

कालिदासस्य ।

---

१८ भैरवः ।

खट्वाङ्गीकृतधूमकेतु घटितप्रेताधिराट्पञ्जर-
प्रोतब्रह्मशिरःकपालवलयं बिभ्रज्जटामण्डलम् ।
कण्ठे सप्तमहर्षिवक्त्ररचितामेकावलीमुद्वहन्
पायाद्वः सुलभव्रतोपकरणः कल्पान्तकापालिकः ॥ १ ॥

कस्यचित् ।

सद्यःप्रध्वस्तदेवासुरसरसशिरःश्रेणिशोणारविन्द-
स्रग्दामानद्धमूर्तेर्घनरुधिरकणक्लिन्नचर्मांशुकस्य ।
निष्पर्यायत्रिलोकीभवकवलरसव्यात्तवक्त्रस्य जीया-
दानन्दः कालरात्रीकुचकलसपरीरम्भिणो भैरवस्य ॥ २ ॥

उमापतिधरस्य ।

वैकुण्ठस्य करङ्कमङ्कनिहितं स्रष्टुः कपालं करे
प्रत्यङ्गं च विभूषणं विरचितं नाकौकसां कीकसैः ।
भस्म स्थावरजङ्गमस्य जगतः शुभ्रं तनौ बिभ्रतः
कल्पान्तेषु कपालिनो विजयते रौद्रं कपालव्रतम् ॥ ३ ॥

भवभूतेः ।

एकाम्भोधीकृतायां भुवि जगदखिलं निर्जनीकृत्य खेल-
न्देवः कालीसहायः प्रसभविहरणोन्मुक्तलीलाट्टहासः ।
सद्यो दंष्ट्रांशुभिन्ने तमसि निजवपुर्विश्वमालोक्य कस्त्वं
कस्त्वं ब्रूहीति कोपादभिदधदभयं भैरवश्चेष्टतां वः ॥ ४ ॥

वैद्यगदाधरस्य ।

कल्पान्ते शमितत्रिविक्रममहाकङ्कालदन्तो स्फुर-
च्छेषस्यूतनृसिंहपाणिनखरप्रोतादिकोलामिषः ।
विश्वैकार्णवतानितान्तमुदितौ तौ मत्स्यकूर्मावुभौ
कर्षन्धीरवतां गतोऽस्त्वतु महामोहं महाभैरवः ॥ ५ ॥

चित्तपस्य ।

---

१९ हरनृत्यारम्भः ।

आर्द्रां कण्ठे भुजाङ्गस्रजमवनमयत्यम्बिकाजानुलम्बां
स्थाने कलेन्दुलेखां निबिडयति जटापन्नगेन्द्रेण नन्दी ।
कालः कृत्तिं निबध्नात्युपनयति करे कालरात्रिः कपालं
शम्भोर्नृत्यावतारे परिषदिति पृथग्व्यापृता वः पुनातु ॥१॥

शतानन्दस्य ।

नन्दिन् खञ्जनमञ्जुनादमुरजं संगृह्य सज्जीभव
कूष्माण्डानय भस्मभाजनमितो लम्बोदरागम्यताम् ।
स्कन्दं नन्दय मन्दिरोदरगतं देवीति रङ्गाङ्गणे
शम्भोस्ताण्डवमण्डनैकमनसः सञ्जल्पितं पातु वः ॥ २ ॥

योगेश्वरस्य ।

भो भो दिक्पतयः प्रयात परतः खं मुञ्चताम्भोमुचः
पातालं व्रज मेदिनि प्रविशत चोणीतलं क्ष्माभृतः ।
ब्रह्मन्नुन्नय दूरमात्मसदनं देवस्य नो नृत्यतः
शम्भोः सङ्कटमेतदित्यवतु वः प्रोत्सारणा नन्दिनः ॥ ३ ॥

तस्यैव ।

अस्थीन्यस्थीन्यजिनमजिनं भस्म भस्मेन्दुरिन्दु-
र्गङ्गा गङ्गोरग उरग इत्याकुलाः सम्भ्रमेण ।
भूषादानोपकरणगणप्रापणव्यापृतानां
नृत्यारम्भप्रणयिनि शिवे पान्तु वाचो गणानाम् ॥ ४ ॥

धनपालस्य ।

क्षोभं क्षोणि क्षमस्व त्वमपि कुरु महाकूर्म कर्म स्वकीयं
भो भोः कैलासमेरुप्रभृतिकुलधराधारिणो गच्छताधः।
ब्रह्मन्नुन्नच्छ दूरं कुरुत जलधयः स्थैर्यमित्यष्टमूर्ते-
र्भर्तुर्नृत्यावतारे सरभसगदिताः पान्तु वो नन्दिवाचः॥ ५॥

द्वैपायनस्य।

२० हरनृत्यम्।

भ्राम्यद्विश्वम्भराणि भ्रमिचलननमत्कूर्मकुम्भीनसानि
त्रुट्यत्ताराणि रिङ्गद्धरणिधरशिरःश्रेणिशीर्यद्दृषन्ति।
दिक्कीर्णोदञ्चदम्भि द्रवदमरचमूचन्द्रचञ्चद्वियन्ति
व्यस्यन्तु व्यापदं वस्त्रिपुरविजयिनस्ताण्डवारम्भणानि॥१॥

राजशेखरस्य।

हेलापादप्रपातान्नमदवनिभराक्रान्तकूर्मेशशेष-
प्रोद्भूतश्वासवातोच्छलदुदधिपयोधौतसूर्येन्दुतारम्।
भ्राम्यद्दोःसङ्गवेगापतदचलकुलध्वानसन्त्रस्तविश्वं
त्रैलोक्यैश्वर्यकारि क्षतु तव दुरितं ताण्डवं चन्द्रमौलेः॥२॥

वाच्छोकस्य।

उत्ताना: कति वेल्लिताः कति रयादाभुग्नमध्याः कति
क्षिप्तोत्क्षिप्तविकुञ्चिताः कति भुजास्तौर्यत्रिकानुक्रमात्।
कल्पान्तेषु महानटस्य झटिति प्रक्रान्तचक्रभ्रमि-
भ्रान्तौ केवलमग्निहासगरलैर्लेखाचयं पातु वः॥ ३॥

सागरधरस्य।

पायाद्वः सुरदीर्घिकाजलरयभ्राम्यज्जटामण्डली-
वेगव्याकुलनागनायकफणाफूत्कारवातोच्छल-
त्सप्ताम्भोनिधिजन्मचण्डलहरीमज्जन्नभोमण्डल-
ग्रासत्रस्तसुराङ्गनाकलकलक्रीड़ाविलक्षो हरः ॥ ४ ॥

ब्रह्महरेः ।

सन्ध्याताण्डवडम्बरव्यसनिनो भीमस्य चण्डभ्रमि-
व्यावृत्यद्भुजदण्डमण्डलभुवो झञ्झानिलाः पान्तु वः ।
येषामुच्छलतां जवेन झगिति व्यूहेषु भूमीभृता-
मुड्डीनेषु विडौजसा पुनरसौ दम्भोलिरालोकितः ॥ ५ ॥

कस्यचित् ।

---

२१ हरप्रसादनम् ।

निःशङ्क शङ्कर करग्रथिताहिभोग
भोगप्रद प्रदलितामरवैरिवृन्द ।
वृन्दारकार्चित चिताभसिताङ्गराग
रागातिदूर दुरितापहर प्रसीद ॥ १ ॥

बाणस्य ।

करकलितपिनाक नाकनाथद्विषदुरुमानसशूल शूलपाणे ।
भव वृषभविमान मानशौण्ड त्रिजगदकारणतारक प्रसीद ॥२॥

सञ्चाधरस्य ।

कटुविशिखशिखिप्रपञ्च पञ्चानन धनदप्रियमित्र मित्रनेत्र।
धृतसकलविकल्प कल्पशेषप्रकटमहानट नाटय प्रसादम् ॥३॥

तस्यैव।

भव शिव शवभस्मगौर गौरीग्रथितशरीर सरीसृपोत्तरीय।
स्मरहर हर भीम भीमभूतप्रकरभयङ्कर शङ्कर प्रसीद ॥ ४ ॥

तस्यैव।

धृतनिधनधनुःप्रचण्ड चण्डीमुखकमलभ्रमरामराधिनाथ।
हर रणरणकान्त कान्तमूर्ते गगनदुकूल विकूलयापदं नः ॥५॥

तस्यैव।

---

२२ गौरी।

यानुद्धूलयतीश्वरः सिकतिला यैर्मौलिमन्दाकिनी
यैर्बालेन्दुकणार्द्रकेतकदलोत्सङ्गे परागायितम्।
यैः कैलासविलासकाननतटीकङ्केल्लिपुष्पोद्गम-
क्रीड़ाकार्मणमद्रिजाचरणयोस्ते रेणवः पान्तु वः ॥ १ ॥

उमापतिधरस्य।

लाक्षारागं हरति शिखरान्जाह्नवीवारि येषां
ये तन्वन्ति स्रजमधिजटामण्डलं मालतीनाम्।
प्रत्युत्सर्पद्विमलकिरणैर्यैस्तिरोधानमिन्दो-
र्देव्याः स्थाणौ चरणपतिते ते नखाः पान्तु विश्वम् ॥ २ ॥

कस्यचित्।

भवजलधिजलावलम्बयष्टिर्महिषमहासुरशैलवज्रधारा।
हरहृदयतड़ागराजहंसी दिशतु शिवं भवतश्चिरं भवानी ॥३॥

भगीरथदत्तस्य।

क्वां तपस्वी गतोवस्थामिति स्मेराविव स्तनौ।
वन्दे गौरीघनाश्लेषभवभूतिसिताननौ ॥ ४ ॥

भवभूतिः।

अभिमतफलसिद्धिसिद्धमन्त्रा-
वलि बलिजित्परमेष्ठिनोरुपास्ये।
भगवति मदनारिनारि वन्दे
निखिलनगाधिपभर्तृदारिके त्वाम् ॥ ५ ॥

वामदेवस्य।

---

२३ विवाहसमयगौरी।

गोनासाय नियोजितागदरजाः सर्पाय बद्धौषधिः
कण्ठस्थाय विषाय वीर्यमहतः पाणौ मणीन्बिभ्रती।
भर्तुर्भूतगणाय गोत्रजरतोनिर्दिष्टमन्त्राचरा
रक्षत्वद्रिसुता विवाहसमये प्रीता च भीता च वः ॥ १ ॥

राजशेखरस्य।

प्रत्यासन्नविवाहमङ्गलविधौ देवार्चनव्यस्तया
दृष्ट्वाग्रे परिणेतुरेव लिखितां गङ्गाधरस्याकृतिम्।

उन्मादस्मितरोषलज्जितरसैर्गौर्या कथञ्चिच्चिरा-
द्वृद्धस्त्रीवचनात्प्रिये विनिहितः पुष्पाञ्जलिः पातु वः ॥२॥

भासस्य ।

ब्रह्मायं विष्णुरेष त्रिदशपतिरसौ लोकपालास्तथैते
जामाता कोऽत्र योऽसौ भुजगपरिवृतो भस्मरूक्षः कपाली ।
हा वत्से वञ्चितासीत्यनभिमतवरप्रार्थनाव्रीडिताभि-
र्देवीभिः शोच्यमानाप्युपचितपुलका श्रेयसे वोऽस्तु गौरी ॥३॥

कस्यचित् ।

धूमव्याकुलदृष्टिरिन्दुकिरणैराह्लादिताक्षी पुनः
पश्यन्ती वरमुत्सुका नतमुखी भूयो ह्रिया ब्रह्मणः ।
सेर्ष्या पादनखाच्छदर्पणगतां गङ्गां दधाने हरे
स्पर्शादुत्पुलका करग्रहविधौ गौरी शिवायास्तु वः ॥ ४ ॥

श्रीहर्षदेवस्य ।

पादाग्रे स्थितया मुहुः स्तनभरेणानीतया नम्रतां
शम्भोः सस्पृहलोचनत्रयपथं यान्त्या तदाराधने ।
ह्रीमत्या शिरसीहितः सपुलकस्वेदोद्गमोत्कम्पया
विश्लिष्यन् कुसुमाञ्जलिर्गिरिजया क्षिप्तोऽन्तरे पातु वः ॥ ५ ॥

तस्यैव ।

---

२४ गौरीशृङ्गारः।

खेदस्ते कथमीदृशः प्रियतमे त्वन्नेत्रवह्नेर्विभो
कस्मात्कम्पितमेतदिन्दुवदने भोगीन्द्रभीतेर्भव।
रोमाञ्चः कथमेष देवि भगवन् गङ्गाम्भसां शीकरै-
रित्थं भर्तरि भावगोपनपरा गौरी चिरं पातु वः॥ १॥

लक्ष्मीधरस्य।

शम्भो सत्यमिदं पयोधिमथने लक्ष्म्या वृते केशवे
वैलक्ष्यात्किल कालकूटमशितं पीतं विषं यत्त्वया।
सत्यं पार्वति नास्ति नः सुभगता साची तथा च स्मरो
देवेनेति कृतस्मृतिः स्मितमुखी गौरी चिरं पातु वः॥ २॥

श्रीहर्षदेवस्य।

चर्मालम्बिदुकूलवल्लरि चिताभस्मावधूतस्तनो-
न्मीलच्चन्दनमुत्तरीयभुजगव्यासक्तमुक्तावलि।
मुग्धाया अपि शैलराजदुहितुर्गङ्गाधरालिङ्गनं
गाढप्रेमरसानुबन्धनिकषग्रावा शिवायास्तु वः॥ ३॥

जलचन्द्रस्य।

शिरसि कुटिला सिन्धुर्दोषाकरस्तव भूषणं
सह विषधरैः प्रत्यासन्ना पिशाचपरम्परा।
हरसि न हर प्राणानेवं न वेद कथं न्विति
प्रणयकुपितक्ष्माभृत्पुत्रीवचांसि पुनन्तु वः॥ ४॥

भगवद्गोविन्दस्य।

नादत्ते फणिकङ्कणप्रणयिनं नीवीनिवेशे करं
नो चूर्णैरुपहन्ति भालनयनज्योतिर्मयीं दीपिकाम्।
धत्ते चर्म हरेण मुक्तमपि न द्वैपं भयादित्यसौ
पायाद्वो नवमोहनव्यतिकरव्रीडावती पार्वती॥ ५॥

आचार्य्यगोपीकस्य।

---

२५ दुर्गा।

एकं महिषशिरःस्थितमपरं सानन्दसुरगणप्रणतम्।
गिरिदुहितुः पदयुगलं शोणितमणिरागरञ्जितं जयति॥१॥

जलचन्द्रस्य।

त्रिभुवनशुभपञ्जिकाञ्जिकेव
स्फुरति भवानि तवाङ्कुशः कराग्रे।
डमरुरपि बिभर्ति देवि तत्त-
द्विपदवसानविसर्जनीयलक्ष्मीम्॥ २॥

हरेः।

ज्याकृष्टिबद्धखटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंवलितोम्बिकायाः
त्वां पातु मञ्जरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः॥ ३॥

अमरोः।

पादावष्टम्भनम्रीकृतमहिषतनोरुल्लसद्बाहुमूलं
शूलं प्रोल्लासयन्त्याः सरलितवपुषो मध्यभागस्य देव्याः ।
विश्लिष्टस्पष्टदृष्टोन्नतविरलबहुव्यक्तगौरान्तराला-
स्तिस्रोव: पान्तु रेखाः क्रमवशविकसत्कञ्चुकप्रान्तमुक्ताः ॥ ४ ॥

बाणस्य ।

विद्राणे रुद्रवृन्दे सवितरि तरले वज्रिणि ध्वस्तवज्रे
जाताशङ्के शशाङ्के विरमति मरुति त्यक्तवैरे कुबेरे ।
वैकुण्ठे कुण्ठितास्त्रे महिषमतिरुषं पौरुषोपघ्नविघ्नं
निर्विघ्नं निघ्नती वः शमयतु दुरितं भूरिभावा भवानी ॥ ५ ॥

तस्यैव ।

---

२६ काली ।

यद्वक्त्राकाशशेषो नभसि न सुलभो यद्भुजानां सहस्रैः
प्रेङ्खद्भिः कीर्यमाणाखिलरपि विदितो नावकाशो दिशासु ।
पञ्च ग्रासा न यस्यास्त्रिभुवनमभवत्पूरणार्थं समस्तं
क्षुत्क्षामाऽकाण्डचण्डी चिरमवतुतरां भैरवी कालरात्रिः ॥१॥

भासोकस्य ।

शिखण्डे खण्डेन्दुः शशिदिनकरौ कर्णयुगले ।
गले ताराहारस्तरलमुडुचक्रं च कुचयोः
तडित्काञ्ची सन्ध्यासिचयरचिता कालि तदयं
तवाकल्पः कल्पव्युपरमविधेयो विजयते ॥ २ ॥

कस्यचित् ।

निर्मांसप्रकटास्थिजालविकटां पातालनिम्नोदरीं
कूपक्रोडगभीरनेत्रकुहरामुन्नद्धजूटाटवीम् ।
दन्तान्तर्गतदैत्यकीकसकणव्याकर्षणव्यापृत-
क्रूरैकाग्रनखाग्रखण्डितरुचं त्वां चण्डि वन्दामहे ॥ ३ ॥

कस्यचित् ।

तारान्तर्ज्वलदग्निलक्षनयनश्वभ्रान्तकूपान्तरां
कुद्धागस्त्यनिरस्तवारिधिपयःपातालनिम्नोदरीम् ।
वन्दे त्वामजिनावृतोत्कटसिराप्रष्ठास्थिसाराकृतिं
दंष्ट्राकोटितटोत्पतिष्णुदितिजासृक्चर्चितां चर्चिकाम् ॥ ४ ॥

उमापतिधरस्य ।

जयति तव कृणितेक्षणमश्नत्या दशनपेषमसुरास्थि ।
कल्पशिखिस्फुटदद्रिध्वानकरालः कडत्कारः ॥ ५ ॥

शतानन्दस्य ।

---

२७ अर्द्धनारीशः ।

स जयति गिरिकन्यामिश्रितार्द्धमूर्त्ति-
स्त्रिपुरयुवतिलीलाविभ्रमभ्रंशहेतुः ।
उपचयवति यस्य प्रोन्नतैकस्तनत्वा-
दुपरि भुजगहारः स्थानवैषम्यमेति ॥ १ ॥

माघस्य ।

आश्लेषाधरबिम्बचुम्बनसुखालापस्मितान्यासतां
दूरे तावदिदं मिथो न सुलभं जातं मुखालोकनम् ।
इत्थं व्यर्थकृतैकदेहघटनाविन्यासयोरावयोः
केयं प्रीतिविडम्बनेत्यवतु वः स्मेरोऽर्द्धनारीश्वरः ॥ २ ॥

कस्यचित् ।

चन्द्रालोकय पश्य पन्नगपते वीक्षध्वमेतद्गणाः
कामारेः स्तनभारमन्थरमुरो लाक्षारुणाङ्घ्रिश्रियः ।
आकर्ण्य त्रिदशापगागिरमिमां सोत्प्रासमाभाषितां
व्रीडास्मेरनताननो विजयते कान्तार्द्धहारीश्वरः ॥ ३ ॥

योगेश्वरस्य ।

स्वच्छन्दैकस्तनश्रीरुभयगतमिलन्मौलिचन्द्रः फणीन्द्र-
प्राचीनावीतवाही सुखयतु भगवानर्द्धनारीश्वरो वः ।
यस्यार्द्धे विश्वदाहव्यसनविसृमरज्योतिरर्द्धे कृपोद्य-
द्वाष्पं चान्योन्यवेगप्रहतिसिमसिमाकारि चक्षुस्तृतीयम् ॥४॥

मुरारेः ।

धम्मिल्लं च जटां च मौक्तिकसरं चाहिं च रत्नानि च
ब्रह्मास्थीनि च कुङ्कुमं च नृशिरस्सूर्णोत्तरं भस्म च ।
क्षौमं च द्विपचर्म चैकवपुषा बिभ्रद्दिशन्नेकतां
भावानामिव योगिनां दिशतु वः श्रेयोऽर्द्धनारीश्वरः ॥ ५ ॥

शङ्करदेवस्य ।

२८ शृङ्गारात्मकार्द्धनारीश्वरः ।

अर्द्धं दन्तच्छदस्य स्फुरति जपवशादर्द्धमप्युत्प्रकोपा-
देकः पाणिः प्रणन्तुं शिरसि कृतपदः चेप्तुमन्यस्तमेव ।
एकं ध्यानान्निमीलत्यपरमविकसद्वीचते नेत्रमित्थं
तुल्यानिच्छाविधित्सा तनुरवतु स वो यस्य सन्ध्याविधाने ॥१॥

कस्यचित् ।

अच्छिन्नमेखलमलब्धदृढोपगूढ-
मप्राप्तचुम्बनमवीचितवक्त्रकान्ति ।
कान्ताविमिश्रवपुषः कृतविप्रलम्भ-
सम्भोगसख्यमिव पातु वपुः स्मरारेः ॥ २ ॥

चित्तपस्य ।

प्रौढप्रेमरसादभेदघटितामङ्गे दधानः प्रियां
देवः पातु जगन्ति केलिकलहे तस्याः प्रसादाय यः ।
व्याहर्त्तुं प्रणयोचितं नमयितुं मूर्धानमप्यक्षमो
धत्ते केवलमेव वामचरणाम्भोजे करं दचिणम् ॥ २ ॥

गदाधरस्य ।

मिश्रीभूतां तव तनुलतां बिभ्रती गौरि कामं
देवस्य स्यादविरलपरीरम्भजन्मा प्रमोदः ।
किन्तु प्रेमस्तिमितमधुरस्निग्धमुग्धा न दृष्टि-
र्दृष्टेत्यन्तःकरणमसकृत्ताम्यति त्र्यम्बकस्य ॥ ४ ॥

भगीरथस्य ।

अन्यस्यै सम्प्रतीमं कुरु मदनरिपो स्वाङ्गदानप्रसादं
नाहं सोढुं समर्था शिरसि सुरनदीं नापि सन्ध्यां प्रणन्तुम्।
इत्युक्त्वा कोपविद्धां विघटयितुमुमामात्मदेहं प्रवृत्तां
रुन्धानः पातु शम्भोः कुचकलसहठस्पर्शक्लृप्तो भुजो वः॥ ५॥

मयूरस्य।

---

२९ गणेशः।

एकः स एव परिपालयताज्जगन्ति
गौरीगिरीशचरितानुकृतिं दधानः।
आभाति यो दशनशून्यमुखैकदेश-
देहार्धहारितवधूक इवैकदन्तः॥ १॥

वसुकल्पस्य।

कपोलादुड्डीनैर्भयवशविलोलैर्मधुकरै-
र्मदाम्भःसंलोभादुपरि पतितुं बद्धपटलैः।
चलद्बर्हच्छत्रश्रियमिव दधानोऽतिरुचिरा-
मविघ्नं हेरम्बो जगदघविघातं घटयतु॥ २॥

तस्यैव।

सन्ध्यासिन्दूररागारुणगगनतलासङ्गिगङ्गोत्तमाङ्ग-
स्त्वङ्गन्नक्षत्रमालाकृतरुचिररुचिः कर्णशङ्खीकृतेन्दुः।
निस्तोयाम्भोदवृन्दैः श्रुतियुगलचलच्चामराडम्बरश्री-
रव्याजालङ्कृतिर्वः प्रवितरतु गणग्रामणीर्मङ्गलानि॥ ३॥

दक्षस्य।

गर्जद्गभीरघनघर्घरघोरघोष-
दिग्दन्तिभीतिजननोद्गतकण्ठनादः ।
धुन्वन्मुखं तव निरस्यतु सर्वविघ्नं
लम्बोदरः सहजनाट्यरसप्रमत्तः ॥ ४ ॥

पापाकस्य ।

देवेन्द्रमौलिमन्दार-मकरन्दकणारुणाः ।
विघ्नं हरन्तु हेरम्ब-चरणाम्बुजरेणवः ॥ ५ ॥

उमापतिधरस्य ।

---

३० कार्त्तिकेयः ।

स्वच्छारम्यं लुठित्वा पितुरुरसि चिरं भस्मधूलीचिताङ्गो
गङ्गावारिण्यगाधे झटिति हरजटाजूटतो दत्तझम्पः ।
सद्यः सीत्कारकारी जलजडिमरणद्दन्तपङ्क्तिर्गुहो वः
कम्पी पायादयायाज्ज्वलितशिखिशिखे चक्षुषि न्यस्तहस्तः ॥१॥

बाणस्य ।

अर्चिष्मन्ति विदार्य्य वक्त्रकुहराण्यासृक्कतो वासुकि-
स्तर्जन्या विषकर्बुरान् गणयतः संस्पृश्य दन्ताङ्कुरान् ।
एकं त्रीणि नवाष्ट सप्त षडिति व्यस्तास्तसंख्याक्रमा-
वाचः शक्तिधरस्य शैशवकलाः कुर्वन्तु नो मङ्गलम् ॥ २ ॥

कस्यचित् ।

सुप्तं पक्षपुटे निलीनशिरसं दृष्ट्वा मयूरं पुरः
कृत्तं केन शिरोऽस्य तात कथमित्याक्रन्दतः शैशवात् ।
अन्तर्हासपिनाकिपाणियुगलस्फालोल्लसच्चेतस-
स्तन्मूर्धेक्षणहर्षितस्य हसितं पायात्कुमारस्य वः ॥ ३ ॥

कस्यचित् ।

हंसश्रेणिकुतूहलेन कलयन् भूषाकपालावलीं
बालामिन्दुकलां मृणालरभसादान्दोलयन् पाणिना ।
रक्ताम्भोजधिया च लोचनयुगं लालाटमुद्घाटयन्
पायाद्वः पितुरङ्कभाक् शिशुजनक्रीडोन्मुखः षण्मुखः ॥ ४ ॥

जलचन्द्रस्य ।

नालैर्नीलोत्पलानां रचितगुरुजटाजूटविन्यासशोभः
कृत्वा सम्भुग्नकोटिद्वयमथ विसिनीकन्दमिन्दोः प्रदेशे ।
मातुश्चित्रांशुकेन त्वचमुचितपदे पौण्डरीकीं विधाय
क्रीडारुद्रायमाणो जगदवतु गुहो वीक्ष्यमाणः पितृभ्याम् ॥५॥

हलायुधस्य ।

---

३१ भृङ्गी ।

दिग्वासा यदि तत्किमस्य धनुषा सास्त्रस्य किं भस्मना
भस्माथास्य किमङ्गना यदि च सा कामं ततो द्वेष्टि किम् ।
इत्यन्योन्यविरोधि चेष्टितमिदं पश्यन्निजस्वामिनो
भृङ्गी सान्द्रसिरावनद्धमपुषं धत्तेऽस्थिशेषं वपुः ॥ १ ॥

योगेश्वरस्य ।

कस्मात्त्वं तातगेहादपरमभिनवा ब्रूहि का तत्र वार्ता
देव्या देवो जितः किं वृषडमरुचिताभस्मभोगीन्द्रचन्द्रान् ।
इत्येवं वर्हिनाथे कथयति सहसा भर्तृभिक्षाविभूषा-
वैगुण्योद्वेगजन्मा जगदवतु चिरं हारवो भृङ्गिरीटेः ॥ २ ॥

तुङ्गोकस्य ।

चर्चेयं क्षुधिता सदैव गृहिणी पुत्रोप्ययं षण्मुखो
दुष्पूरोदरभारमन्थरवपुर्लम्बोदरोऽपि स्वयम् ।
इत्येवं स्वकुटुम्बमेकवृषभो देवः कथं पोक्ष्यती-
त्यालोक्येव विशुष्कपञ्जरतनुर्भृङ्गी चिरं पातु वः ॥ ३ ॥

नीलाङ्गस्य ।

भिक्षाभोजिनि कृत्तिवाससि वसुप्राप्तिः कुतः स्यादिति
प्रागर्द्धं वपुषः स्वयं व्यसनिनो यस्याहरत्पार्वती ।
तस्यार्द्धं कुपिता हठाद्यदि हरेन्मूर्ध्नि स्थिता जाह्नवी
हा नाथः क्व तदेति दुःस्थहृदयो भृङ्गी चिरं शुष्यति ॥ ४ ॥

भवानन्दस्य ।

सेवां नो कुरुते करोति न कृषिं वाणिज्यमस्यास्ति नो
पैत्रं नास्ति धनं न बान्धवबलं नैवास्ति कश्चिद्गुणः ।
द्यूतस्त्रीव्यसनं न मुञ्चति तथापीशस्तदस्मात्फलं
किं मे स्यादिति चिन्तयन्निव कृशो भृङ्गी चिरं पातु वः ॥५॥

कस्यचित् ।

३२ गणोच्चावचम् ।

स्थूलो दूरमयं न यास्यति कृशो नैष प्रयातुं क्षम-
स्तेनैकस्य ममैव तत्र कथिपुप्राप्तिः परं दृश्यते ।
इत्यादौ परिचिन्तितं प्रतिमुहुस्तद्भृङ्गिकूष्माण्डयो-
रन्योन्यप्रतिकूलमीशशिवयोः पाणिग्रहे पातु वः ॥ १॥

तुङ्गीकस्य ।

चर्चायाः कथमेष रक्षति सदा सद्यो नृमुण्डस्रजम्
चण्डीकेशरिणो वृषं च भुजगान् सूनोर्मयूरादपि ।
इत्यन्तः परिभावयन् भगवतो दीर्घं धियः कौशलं
कूष्माण्डो धृतिसम्भृतामनुदिनं पुष्णाति तुन्दश्रियम् ॥ २ ॥

कस्यचित् ।

देवी सूनुमसूत नृत्यत गणाः किं तिष्ठतेत्युद्भुजे
हर्षाद्भृङ्गिरिटावयाचितगिरा चामुण्डयालिङ्गिते ।
अव्याद्वो हतदुन्दुभिस्वनघनध्वानातिरिक्तस्तयो-
रन्योन्यप्रचलास्थिपञ्जररणत्कङ्कारजन्मा रवः ॥ ३ ॥

योगेश्वरस्य ।

भृङ्ग भृङ्गिन्विमुञ्च त्यज गजवदन त्वं च लाङ्गूलमूलं
मन्दानन्दोऽसि नन्दिन्नलमबल महाकाल कण्ठग्रहेण ।
इत्युक्त्वा नीयमानः सुखयतु वृषभः पार्वतीपादमूले
पश्यन्नच्चैर्विलक्षं बलितगतिचलत्कम्बलं त्र्यम्बकं वः ॥ ४ ॥

अभिनन्दस्य ।

दिग्वासा वृषवाहनो नरशिरोधारी दधानोऽजिनं
भिक्षुर्भस्मभुजङ्गभूषिततनुर्भूतैर्भ्रमन् काननम् ।
स्मर्तॄणां शिवकृत्तथापि जगति स्वेच्छोऽस्मदीयः प्रभु-
र्धन्योऽस्मीत्यतितोषपुष्टजठरः कूष्माण्डको ऽव्याज्जगत् ॥ ५ ॥

महानिधेः ।

---

३३ हरिहरौ ।

यद्गङ्गार्धजटं यदर्धमुकुटं यच्चन्द्रमन्दारयो-
र्धत्ते धाम च दाम च स्मितलसत्कुन्देन्द्रनीलश्रियोः ।
तत्खट्वाङ्गरथाङ्गसङ्गविकटं श्रीकण्ठवैकुण्ठयो-
र्वन्दे नन्दिमहोक्षतार्क्ष्यपरिषन्नामाङ्कमेकं वपुः ॥ १ ॥

राजशेखरस्य ।

नियमितजटावल्लीलीलाप्रसुप्तमहोरगं
चरणकमलप्रान्ते मुक्तस्वविक्रमगोवृषम् ।
विततफणिभुक्पत्रच्छत्रं गदालगुडाश्रयं
हरिहरवपुर्ब्रह्मोपास्यं पुनातु जगत्त्रयम् ॥ २ ॥

भवानन्दस्य ।

येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो
यो गङ्गां च दधेऽन्धकक्षयकरो यो बर्हिपत्रप्रियः ।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
सोऽव्यादिष्टभुजङ्गहारवलयस्त्वां सर्वदो माधवः ॥ ३ ॥

भारवेः ।

एकावस्थितिरस्तु वः पुरमुरप्रद्वेषिणोर्देवयोः
प्रालेयाञ्जनशैलशृङ्गसुभगच्छायाङ्गयोः श्रेयसे ।
तार्क्ष्यत्रासविहस्तपन्नगफटा यस्यां जटापालयो
र्बालेन्दुद्युतिसुप्तकोशजलजो यस्यां च नाभीह्रदः ॥ ४ ॥

तुङ्गोकस्य ।

यज्जम्बूकम्बुरोचिः फणधरपरिषद्भोजिभोगीन्द्रकान्तं
नन्दच्चन्द्रारविन्दद्युतिचरणशिरःस्यन्दिमन्दाकिनीकम् ।
रक्षासंहारदक्षं मदनसमुदयोद्दीपनं शश्वदव्या-
दव्याघातं विबोधेऽप्युदधिगिरिसुताकान्तयोर्देहमेकम् ॥५॥

जलचन्द्रस्य ।

---

३४ कान्तासहितहरिहरौ ।

सम्भोगस्पृहयालुमन्मथपुनर्जन्मास्पदं भूर्भुवः-
स्वः पायात्पुरुषोत्तमक्रतुभिदोरर्द्धाङ्गपूर्णं वपुः ।
यल्लक्ष्मीगिरिजाकटाक्षकुटिलक्रीडाहठाकृष्टिभिः
स्यादेव त्रुटितं परस्परगुणस्यूतं न चेदन्तरा ॥ १ ॥

त्रिपुरारिपालस्य ।

वपुरवतु जटाकिरीटमिश्रं
पुरसुरसूदनयोर्विमिश्रितं वः ।
गिरिजलधिसुतास्वभर्तृकण्ठग्रह-
चलिताह्वतबाहुवल्लरीकम् ॥ २ ॥

तस्यैव ।

स्फटिकमरकतश्रीहारिणोः प्रीतियोगा-
त्तदवतु वपुरेकं कामकंसद्विषोर्वः ।
न विरमति भवान्याः सार्धमब्धेर्दुहित्रा
सह्ग्रमहसि कण्ठे यत्र सीमाविवादः ॥ ३ ॥

योगेश्वरस्य ।

देवस्यैकतमालपत्रमुकुटस्यार्धं पुरद्वेषिणो
देहार्द्धेन समस्यमानमसमं श्वःश्रेयसायास्तु वः ।
यस्मिन् भूधरकन्यकाब्धिसुतयोरप्राप्तसम्भोगयो-
रन्योन्यप्रतिकर्मनर्मभिदुरो भूयाननङ्गज्वरः ॥ ४ ॥

हरेः ।

धात्रा सौहृदसौमविस्मितमुखं भेदभ्रमापासना-
त्सानन्दं मुनिभिः सनिर्वृति सुरैरेकत्र सेवासुखात् ।
पार्वत्या स्वपदापकृष्टिकुटिलभ्रूभङ्गमालोकितः
पायाद्वो भगवांश्चराचरगुरुर्देहार्धहारी हरिः ॥ ५ ॥

आर्याविलासस्य ।

---

३५ गङ्गा ।

ब्राह्मं तेजो द्विजानां ज्वलयति जडिमप्रक्रमं हन्ति बुद्धे-
र्वृद्धिं सेकेन सद्यः शमयति बलिनो दुष्कृतानोकहस्य ।
ऊर्द्ध्वं चैवात्र लोकादपि नयतितरां जन्मिनो मग्नमूर्ती-
स्त्वद्वारावारि काशीप्रणयिनि परितः प्रक्रिया कीदृशीयम् ॥ १ ॥

कोलाहलस्य ।

दुर्वारदोषतिमिरागमवासरश्रीः
कैवल्यकैरवविकाससितांशुलेखा ।
जीयात्त्रिविष्टपधुनी कलिकाल-
भग्नगीर्वाणराजनगराकरवैजयन्ती ॥ २ ॥

ग्रहेश्वरस्य ।

तीर्थाटनैः किमधिकं क्षणमोक्षिता
चेत्पीतं त्वदम्बु यदि देवि मुधा सुधापि ।
स्नातं यदि त्वयि विरिञ्चिपुरं न दूरे
मुक्तिः करे यदि च सा समुपासितासि ॥ ३ ॥

विरिञ्चेः ।

तीरं तवावतरतीह यथा यथैव
देहेन देवि जरता मनुजो मुमूर्षुः ।
अम्ब स्वयंवरवशंवदनाकनारी-
दोर्वल्लिपल्लवि नभोऽपि तथा तथैव ॥ ४ ॥

तस्यैव ।

तप्तं यन्न तपो हुतं च न हविर्यज्जातवेदोमुखे
दत्तं यच्च न किञ्चिदेव न कृतो यत्तीर्थयात्रादरः ।
काकेनेव शुनेव केवलमयं यत्पूरितः पुद्गलो
मातस्त्वां परिरभ्य जाह्नवि स मे शान्तोयमन्तर्ज्वरः ॥ ५ ॥

सेन्तुतस्य ।

३६ गङ्गाप्रशंसा ।

धर्मस्योत्सववैजयन्ति मुकुटस्रग्वेणि गौरीपते-
स्त्वां रत्नाकरपत्नि जह्नुतनये भागीरथि प्रार्थये ।
त्वत्तोयान्तशिलानिषण्णवपुषस्त्वद्वीचिभिः प्रेङ्खत-
स्त्वन्नाम स्मरतस्त्वदर्पितदृशः प्राणाः प्रयास्यन्ति मे ॥ १ ॥

लक्ष्मीधरस्य ।

शक्तौ मे सुहृदीव काप्युपकृतिर्भूयादसूया न तु
स्वाच्छ्यं सत्सु मतिर्जनेषु करुणा हीना न दीनात्मसु ।
प्रक्षीणा कलिकल्मषक्षयकरी तृष्णा न कृष्णार्चने
देवि श्रद्दधतां गतिस्त्वयि मुदा मन्दा न मन्दाकिनि ॥ २ ॥

तस्यैव ।

प्रसीद श्रीगङ्गे मृडमुकुटचूडाग्रसुभगे
तवोल्लोलोन्मूलः स्खलतु मम संसारविटपी ।
अथोत्पत्त्यै भूयस्त्रिजगदधिराज्येऽपि न तदा
श्वपाकः काको वा भगवति भवेयं तव तटे ॥ ३ ॥

पादुकस्य ।

कदा ते सानन्दं विततनवदूर्वाञ्चिततटी-
कुटीरे तीरे वा सवनमनु मन्वादिकथितैः ।
कथाबन्धैरन्धङ्करणकरणग्रामनियमा-
द्यमादुज्झन् भीतिं भगवति भवेयं प्रमुदितः ॥ ४ ॥

गोपीचन्द्रस्य ।

बद्धाञ्जलिर्नौमि कुरु प्रसादमपूर्वमाता भव देवि गङ्गे ।
अन्ते वयस्यङ्कगताय मह्यमदेहबन्धाय पयः प्रयच्छ ॥ ५ ॥

केवट्टपपीपस्य ।

---

३७ हरेर्मत्स्यावतारः ।

मत्स्यः पुनातु जगदोङ्कृतिकुञ्चितास्यो
ब्रह्माह्वयप्रणयपीवरमध्यभागः ।
क्रीडन्नसौ जलधिवीचिभिरेव नेति
नेत्यादरादिव विभावितपुच्छकम्पः ॥ १ ॥

आवन्त्यकृष्णस्य ।

देव्याः श्रुतेर्दनुजदुर्णयदूषिताया
भूयः समुद्गमविधावलम्बभूमिः ।
एकार्णवीभवदशेषपयोधिध्य-
द्वीपं वपुर्जयति मीनतनोर्मुरारेः ॥ २ ॥

उमापतिधरस्य ।

ब्रह्माण्डोदरदर्पणे भ्रमिरयोत्क्षिप्ताम्बुधिक्षालिते
संक्रान्तामनिमेषलोचनयुगेनोत्पश्यतः स्वान्तनुम् ।
शौरेर्मीनतनोः कृशानुकपिशं पार्श्वद्वयं प्रोल्लस-
च्चन्द्रार्काङ्कितकाञ्चनाद्रिशिखराकारं शिरः पातु वः ॥ ३ ॥

वसन्तदेवस्य ।

पातु त्रीणि जगन्ति पार्श्वकषणप्रक्षुण्णदिङ्मण्डलो
नैकाब्धिस्तिमितोदरः स भगवान्क्रीडाझषः केशवः ।
त्वङ्गन्निष्ठुरपृष्ठरोमखचितब्रह्माण्डभाण्डावधे-
र्यस्योत्फालकुतूहलेन कथमप्यङ्गेषु जीर्णायितम् ॥ ४ ॥

रघुनन्दनस्य ।

मत्स्यः पुच्छाभिघातेन तुच्छीकृतमहोदधिः ।
अपर्याप्तजलक्रीडारसो दिशतु वः शिवम् ॥ ५ ॥

कस्यचित् ।

---

३८ कूर्मः ।

पृष्ठभ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयना-
न्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु वः ।
यत्संस्कारकलानुवर्तनवशाद्वेलाच्छलेनाम्भसां
यातायातमयन्त्रितं जलनिधेर्नाद्यापि विश्राम्यति ॥ १ ॥

केशटाचार्यस्य ।

क्षीराब्धौ मथ्यमाने त्रिदशदनुसुतोद्भूतकोलाहलोद्यद्-
ब्रह्माण्डाकाण्डचण्डस्फुटनगुरुरवभ्रान्तिभाजि त्रिलोक्याम् ।
सद्यो निद्रावबोधादुपरि रयवशक्षिप्तदीर्घचितिभ्रा-
लग्नग्रीवाप्रकाण्डो जयति कमठराट् चण्डविष्कम्भतुल्यः ॥२॥

बन्धसेनस्य ।

पायाद्वो मन्दराद्रिभ्रमणनिकषणाक्लृष्टपृष्ठाग्रकण्डू-
लीलानिद्रालुरब्धेः क्षुभितमगणयन्नद्भुतः कूर्मराजः ।
यस्याङ्गामर्दहेलावशचलितमहाशैलकीला धरित्री
त्वङ्गत्कल्लोलरत्नाकरवलयचलन्मेखला नृत्यतीव ॥ ३ ॥

सूरेः ।

पार्श्वास्फालातिवेगाज्झगिति च विरहादुच्छलद्भिः पतद्भि-
र्भूयोभूयः समुद्रैर्मिहिरमतिरयादापिबद्भिर्वमद्भिः ।
कोटीरस्तोदयानां क्षणमिव गगने दर्शयन्वः पुनीता-
दीषन्नात्नावहेलाचलितवसुमतीमण्डलः कूर्मराजः ॥ ४ ॥

धरणीधरस्य ।

कुर्मः कूर्माकृतये हरये मुक्तावलम्बनाय नमः ।
पृष्ठे यस्य निषण्णं शैवलवल्लीसमं विश्वम् ॥ ५ ॥

भवानन्दस्य ।

---

३८ वराहः ।

दंष्ट्रापिष्टेषु सद्यः शिखरिषु न कृतः स्कन्धकण्डूविनोदः
सिन्धुष्वङ्गावगाहः खुरकुहरविशत्तोयतुच्छेषु नाप्तः ।
प्राप्ताः पातालपङ्के ननु च न रतयः पोत्रमात्रोपयुक्ते
येनोद्धारे धरित्र्याः स जयति विभुताविंहितेच्छो वराहः ॥१॥

वराहमिहिरस्य ।

अस्ति श्रीस्तनपत्रभङ्गमकरीमुद्राङ्कितोरस्थलो
देवः सर्वजगत्पतिर्मधुवधूवक्त्राब्जचन्द्रोदयः।
क्रीडाक्रोडतनोर्नवेन्दुविशदे दंष्ट्राङ्कुरे यस्य
भूर्भाति स्म प्रलयाब्धिपल्वलतलोत्खातैकमुस्ताकृतिः॥ २॥

नग्नस्य।

सेयं चन्द्रकलेति नाकवनितानेत्रोत्पलैरर्चिता
मद्भारापगमक्षमेति फणिना सानन्दमालोकिता।
दिङ्नागैः सरलीकृतायतकरैः स्पृष्टा मृणालाशया
भिन्त्वोर्वीमभिनिःसृता मधुरिपोर्दंष्ट्रा चिरं पातु वः॥ ३॥

केशवस्य।

घोणाघोराभिघातोच्छलदुदधिजलासारसिक्ताग्ररोमा
रोमाग्रप्रोततारानिकर इति सुरैर्धीरमालोकितो वः।
श्वासाकृष्टावकृष्टप्रविशदपसरद्भग्नबिम्बानुबन्धा-
दाविर्नक्तन्दिनश्रीः स दिशतु दुरितध्वंसमाद्यो वराहः॥ ४॥

नरसिंहस्य।

येनाधोमुखपद्मिनीदलधिया कूर्मश्चिरं वीक्षितो
घ्रातो येन मृणालमुग्धलतिकाबुद्ध्या फणिग्रामणीः।
यः शालूकमिवोद्दधार धरणीबिम्बं पुनीतादसौ
त्वामेकार्णवपल्वलैकरसिकः क्रीडावराहो हरिः॥ ५॥

कस्यचित्।

———

४० नरसिंहः।

सीमाधीयितनिष्पिधानदशनः सन्ध्यायितान्तर्मुखो
बालार्कायितलोचनः सुरधनुर्लेखायितभ्रूलतः।
अन्तर्नादगभीरपल्वलगलत्कूपनिर्यत्तडि-
त्तारस्फारसटावरुद्धगगनः पायान्नृसिंहो जगत्॥ १॥

मुरारेः।

चटच्चटिति चर्मणि च्छमिति चोच्छलच्छोणिते
धगद्धगिति मेदसि स्फुटतरोऽस्थिषु ष्ठादिति।
पुनातु भवतो हरेरमरवैरिनाथोरसि
क्वणत्करजपञ्जरक्रकचकाषजन्मा रवः॥ २॥

वाक्पतिराजस्य।

प्रेङ्खद्भास्वरकेशरीघरचितत्रैलोक्यसन्ध्यातपो
ब्रह्माण्डोदररोधिघर्घरसघूत्कारप्रचण्डध्वनिः।
स्फूर्जद्वज्रकठोरघोरनखरक्षुण्णासुरोरःस्थली-
रक्तास्वादविदीर्णदीर्घरसनः पायान्नृसिंहो जगत्॥ ३॥

तस्यैव।

चक्र ब्रूहि विभो गदे जय हरे कम्बो समाज्ञापय
भोभो नन्दक जीव पन्नगपते किं नाथ भिन्नो मया।
को दैत्यः कतमो हिरण्यकशिपुः सत्यं भवद्भिः अपि
केनास्त्रेण नखैरिति प्रवदतः शौरेर्गिरः पान्तु वः॥ ४॥

केशटस्य।

किं किं सिंहस्ततः किं नरसदृशवपुर्देव चित्रं गृहीतो
नैवं धिक्कोत्र जीव द्रुतमुपनय तं सोपि सम्प्राप्त एव।
चापं चापं न सज्जं झटिति हहह हा कर्कशत्वं नखाना-
मित्येवं दैत्यराजं निजनखकुलिशैर्जघ्निवान् सोवतादः॥ ५॥

श्रीव्यासपादानाम्।

---

४१ नरसिंहनखाः।

दंष्ट्रासङ्कटवक्त्रवर्धरललज्जिह्वाभृतो हव्यभुग्-
ज्वालाभास्वरभूरिकेशरसटाभारस्य दैत्यद्रुहः।
व्यावल्गद्दलवद्धिरण्यकशिपुक्रोडस्थलीपाटन-
स्पष्टप्रस्फुटदस्थिपञ्जररवक्रूरा नखाः पान्तु वः॥ १॥

दक्षस्य।

ये बालेन्दुकलार्धविभ्रमभृतो मायानृसिंहाकृते-
र्निर्याता इव ये सिरासरणिभिर्नाभ्यब्जकन्दाङ्कुराः।
ते वक्षस्थलदारितासुरसरित्कीलालधारारुणाः
पायासुर्नवकिंशुकाग्रमुकुलश्रीसाक्षिणः पाणिजाः॥ २॥

वराहस्य।

अस्रस्रोतस्तरङ्गभ्रमिषु तरलिता मांसपङ्के लुठन्तः
स्थूलास्थिग्रन्थिभङ्गैर्धवलविसलताग्रासमाकल्पयन्तः।
मायासिंहस्य शौरेः स्फुरदरुणहृदम्भोजसंश्लेषभाजः
पायासुर्दैत्यवक्षस्थलकुहरसरोराजहंसा नखा वः॥ ३॥

मयूरस्य।

पुनन्तु भुवनत्रयं दलितदैत्यवक्षस्थल-
प्रसर्पिरुधिरच्छटाच्छुरणबालसूर्यत्विषः।
दृढास्थिचयचूर्णनाघटितशब्दसारा हरे-
र्नृसिंहवपुषश्चिरं पिशितपिण्डगर्भा नखाः॥ ४॥

धूर्जटिराजस्य।

जयन्ति निर्दारितदैत्यवक्षसो
नृसिंहरूपस्य हरेर्नखाङ्कुराः।
विचिन्त्य येषां चरितं सुरारयः
प्रियानखेभ्योपि रतेषु बिभ्यति॥ ५॥

कस्यचित्।

---

४२ शृङ्गारिनरसिंहः।

लक्ष्मीमुरःपरिसरे वहतः सलीलं
योगासनं च चरतो नृहरेर्जयन्ति।
एकक्षणोपनतमान्मथभावमुग्ध-
स्वात्मावबोधमसृणानि विलोकितानि॥ १॥

कस्यचित्।

न्यञ्चत्केसरमुत्तरङ्गपुलकस्त्रग्नद्धमर्धस्खल-
द्धन्दालापमपास्तगर्जमनटद्भ्रूभङ्गमार्द्रेक्षणम्।
स्विद्यत्पाणि विनीतदृप्तिकरजं पायान्नृसिंहाकृते-
र्देवस्य श्रियमङ्कसीम्नि दधतो विश्रान्तरौद्रं वपुः॥ २॥

वैद्यगदाधरस्य।

स्वच्छन्दं वैरिवक्षस्थलकुलिशभिदो वीक्ष्य कन्दर्पचाप-
क्रीडाभाजो नखाग्रान् समसमयभयानन्दलोलायताक्ष्याः।
लक्ष्म्या वक्षोजकुम्भद्विरिकलभशिरःशङ्कया वीक्षमाणः
स्वैरं शान्ताभिरागो जयति नरहरिर्जातचित्तानुरागः ॥ ३ ॥

जलचन्द्रस्य।

अव्यादो वज्रसारस्फुरदुरुनखरक्रूरचक्रक्रमाग्र-
प्रोद्भिन्नेन्द्रारिवक्षस्थलगलदसृगासारकाश्मीरगौरः।
प्रस्फूर्जत्केशराग्रग्रथितजलधरश्रेणिनीलाब्जमाल्यः
सूर्याचन्द्रावतंसो नरहरिरसमाबद्धशृङ्गारलीलः ॥ ४ ॥

प्रजापतेः।

आनन्दमुग्धनयनां श्रियमङ्कभित्तौ
बिभ्रत्पुनातु भवतो भगवान्नृसिंहः।
यस्यावलोकनविलासवशादिवासौ-
दुल्लक्ष्मलाञ्छनमृगः कमलामुखेन्दुः ॥ ५ ॥

उमापतिधरस्य।

---

४३ वामनः।

इदं प्रायो लोके न परिचितपूर्वं नयनयो-
र्न याञ्चा यत्पुंसः सुगुणपरिमाणं लघयति।

विग्नङ्घिर्विश्वात्मा स्ववपुषि वलिप्रार्थनकृते
त्वपालीनैरङ्गैर्यदयमभवद्वामनतनुः ॥ १ ॥

दङ्गस्य ।

अपसर पृथिवि समुद्राः संवृणुताम्बूनि भूभृतो नमत ।
वामनहरिलघुतुन्दे जगतीकलहः स वः पातु ॥ २ ॥

भवानन्दस्य ।

कुतस्त्वमनु कं स्वतः स्वमिति किं न यत्कस्यचि-
त्किमिच्छसि पदत्रयं ननु भुवा किमित्यल्पया ।
द्विजस्य शमिनो मम त्रिभुवनं तदित्याशयो
हरेर्जयति निह्नुतः प्रकटितश्च वक्रोक्तिभिः ॥ ३ ॥

वाक्पतेः ।

पूज्यो ब्रह्मविदां त्वमेव विमलज्ञानैकपात्रं भवा-
न्मद्भाग्येन गतोऽतिथित्वमधुना किं ते त्रिभिर्भूपदैः ।
त्रैलोक्यं भवतः स्वमित्युपगतो दैत्येश्वरेणादरा-
उज्ञातोस्मीति सलज्जनम्रवदनः पायाज्जगद्वामनः ॥ ४ ॥

वसुसेनस्य ।

लक्ष्मीपयोधरोत्सङ्गकुङ्कुमारुणितो हरेः ।
बलिरेष स येनास्य भिक्षापात्रीकृतः करः ॥ ५ ॥

गणाध्यक्षस्य ।

---

४४ त्रिविक्रमः।

किं छत्रं किं नु रत्नं तिलकमथ तथा कुण्डलं कौस्तुभो वा
चक्रं वा वारिजं वेत्यमरयुवतिभिर्यद्बलिध्वंसिदेहे।
ऊर्ध्वं मौलौ ललाटे श्रवसि हृदि करे नाभिदेशे च दृष्टं
पायात्तद्वोऽर्कबिम्बं स च दनुजरिपुर्वर्द्धमानः क्रमेण ॥ १ ॥

श्रीहनूमतः।

ज्योतिश्चक्राक्षदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः
क्षोणीनौकूपदण्डः शतधृतिभवनाम्भोरुहो नालदण्डः।
ब्रह्माण्डच्छत्रदण्डस्त्रिभुवनभवनस्तम्भदण्डोऽङ्घ्रिदण्डः
श्रेयस्त्रैविक्रमस्ते वितरतु विबुधद्वेषिणां कालदण्डः ॥ २ ॥

दण्डिनः।

चञ्चत्पादनखाग्रमण्डलरुचिप्रस्यन्दिगङ्गाजलो
विस्फूर्जद्बलिराज्यनाशपिशुनोत्पाताम्बुवाहद्युतिः।
पातु त्वां चरणो हरेः क्रमविधौ यस्याधिकं द्योतते
दूरादङ्गुलिमुद्रिकामणिरिव स्फारांशुजालो रविः ॥ ३ ॥

विक्रमादित्यस्य।

यत्काण्डं गगनद्रुमस्य यदपि क्षोणीतडागोदरे
देवस्यैव यशोम्बुशोभिनि महायष्टिः प्रतिष्ठाकरी।
तद्विष्णोः पदमन्तरालजलधेराधारतो भूतला-
त्पारं द्यामुपगन्तुमुद्यमवतां सेतूभवत्पातु वः ॥ ४ ॥

चक्रपाणेः।

खर्वग्रन्थिविमुक्तसन्धिविकसद्वक्षःस्फुरत्कौस्तुभं
निर्यन्नाभिसरोजकुड्मलकुटीगम्भीरसामध्वनि ।
पातालाप्तिसमुत्सुकेन बलिना सानन्दमालोकितं
पायाद्वः क्रमवर्धमानमहिमाश्चर्यं मुरारेर्वपुः ॥ ५ ॥

वाक्पतिराजस्य ।

---

४५ परशुरामः ।

दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा सापि वदन्त एव हि वयं रोमाञ्चिताः पश्यत ।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मैवाविरभूत्कथाद्भुतमिदं यत्रैव चास्तं गतम् ॥ १ ॥

केशटस्य ।

हा तातेति न जल्पितं न रुदितं न स्वीकृतं तद्वनं
न स्नातं न च वीक्षितः परिजनः पित्रे न दत्तं जलम् ।
यावन्न क्रकचाभिघातविगलद्राजन्यमर्माणामसृ-
ग्गण्डूषैर्घनघोरघर्घररवाः सन्तर्पिताः फेरवः ॥ २ ॥

तस्यैव ।

शौर्यं शत्रुकुलक्षयावधि यशो ब्रह्माण्डखण्डावधि
त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः ।
वीर्यं यत्तु गिरां न तत्पथि ननु व्यक्तं हि तत्कर्मभिः
सत्यं ब्रह्मतपोनिधेर्भगवतः किं किं न लोकोत्तरम् ॥ ३ ॥

भवभूतेः ।

गोत्राचारविशेषपारगतया वृद्धाभिरादिष्टया
माता वस्तुषु तेषु तेषु विषदन्यस्तेषु दृष्टेः पुरः ।
अन्नप्राशनवासरे सरभसं वक्षोभरोत्सर्पिणा
येनात्तं धनुरीक्षिताश्च झटिति चलावतंसा दिशः ॥ ४ ॥

केशटस्य ।

त्रिःसप्तावधि बाधिता क्षितिभुजामाजन्म वैखानसः
कर्ता मातृवधैनसः स सकलश्रुत्यर्थवीथीगुरुः ।
विश्वस्याश्च भुवः क्रतौ वितरिता श्यामाकमुष्टिंपचो
रामः सोयमुदग्रगीयमहिमा कासां गिरां गोचरः ॥ ५ ॥

कस्यचित् ।

---

४६ श्रीरामः ।

शौर्योत्कर्षतृणीकृतत्रिभुवनो लङ्कापतिः सोभव-
त्कारायामुपवासयन्विजयते तं हेलया हैहयः ।
लीलालूनविशालतद्भुजवनोभूज्जामदग्न्यस्तत-
विदूषकादिभिः सा तु रहोगोष्ठ्यां प्रशस्यते ॥७॥
क्रियमाणा, तत्प्रपञ्चो नाटकादौ निरीक्ष्यताम् ।
आख्यायिकादिष्वपि च समासव्यासयोगतः ॥८॥
प्राणसन्देहकृत्कार्य्यं कृतं साहसमुच्यते ।
तदापत्सु च शोभायै भवेद्धास्याय चान्यदा ॥९॥
प्रकीर्णता चाग्रहणमपात्रे प्रतिपादनम् ।

---

१ A B C अहः स्वप्नमृगया चेति ।

मूलच्छेदेन वा दानप्रतिपत्त्यर्थदूषणम् ।
तत् प्रयत्नेन चाप्तैस्तु कारयेत् परमण्डले ॥१०॥

सूचनं परदोषाणां पैशुन्यमिति गीयते ।
तच्चारमुखतः सर्व्वं श्रोतव्यं स्वधिया पुनः ।
निश्चित्य चारैरन्यैश्च प्रतीकारं तदाचरेत् ॥११॥

दण्डादिपातने क्रौर्य्यं क्रोध इत्युच्यते बुधैः ।
सदापकारिषु च तं विदध्यान्नेतरेषु च ॥१२॥

सुलक्षणा कलाभिज्ञा दक्षा सौभाग्यसंयुता ।
वयोविनयसम्पन्ना सा स्त्री स्त्रीत्युच्यते बुधैः ॥१३॥
साधनं सा त्रिवर्गस्य गृहस्थाश्रमलक्ष्म[1] च ।
प्रसूत्युपस्करप्रेक्षामनःप्रह्लादनादिभिः ॥१४॥
एतत् कुमारेणाप्युक्तं पुरागस्त्याय पृच्छते ।
"यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते" ॥१५॥
धर्म्मादर्थोऽर्थतः कामः कामः स्त्रीभ्यो न चान्यतः ।
तेन धर्म्मद्रुमस्याहो फलं रक्षा नितम्बिनी ॥१६॥
अतस्तां सर्व्वभावेन पुमांश्चैवानुरञ्जयेत् ।
स्वच्छन्दाचरणं हित्वा कामसंवेदनादिषु ॥१७॥
कामस्त्वनन्यमनसोर्दम्पत्यो र्यः परस्परम् ।
आत्मैकवेद्यो नाख्येयः स्पर्शः काम इतीरितः ॥१८॥
गुणाढ्यव्यासवाल्मीकिसूक्तिसुक्तार्णवेषु च ।
सम्भोगविप्रलम्भाभ्यां प्रपञ्चस्तस्य विस्तरः ॥१९॥

---

1 B कर्म्म ।

क्रीडा सजीवनिर्जीवा ग्लहपूर्व्वाच उच्यते ।
स चार्थवृद्धौ कामर्द्धौ सुप्रयुक्तः प्रजायते ॥२०॥
यत्पानात् मत्ततामेति तद्वस्तु मदिरोच्यते ।
अचिकित्स्येष्वामयेषु तज्ज्ञैः सापि प्रशस्यते ॥२१॥
गेयं यद्रक्तकण्ठस्य तालस्वरसमन्वितं ।
लास्योपयोगि तद्गीतं गीतज्ञास्तद्विजानते ॥२२॥
यथावकाशेन च तच्चतुर्वर्गस्य साधनम् ।
प्रत्यक्षेणार्थकामस्य सिद्धिर्गाने प्रदृश्यते ॥२३॥
धर्म्मापवर्गयोः सिद्धिर्भरतेन यथोदिता ।
याज्ञवल्क्येन मुनिना तथान्यैर्नारदादिभिः ॥२४॥
गीतज्ञो यदि गीतेन नाप्नोति परमं पदम् ।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥२५॥
उद्धतं ताण्डवं यच्च लास्यञ्चाभिनयात्मकम् ।
तालोलयसमायुक्तं द्विविधं नृत्यमुच्यते ॥२६॥
चतुर्व्विधं वाद्यमुक्तं[1] तत्तादिप्रभेदतः ।
प्रयोजनं गीतवच्च विज्ञेयं नृत्यवाद्ययोः ॥२७॥
कार्य्यं विना यदुद्याननगराद्युपसर्पणम् ।
वृथाटनं तदुक्तन्तु शरीरालस्यशान्तये ॥२८॥
परोक्षनिन्दा व्यक्तार्था सातिसन्धातुमिष्यते ॥२९॥
सर्व्वर्त्तुषु दिवास्वप्नः सोऽपि व्यक्तार्थ एव हि ।
बालातिसारिक्षीणेषु स चाजीर्णिषु शोभनः ॥३०॥

---

१ C चतुर्विधमिदं वाद्यं ।

त एते सप्तदश च मृगया[१] द्वादशी तथा ।
हेयाहेयाः पुरा प्राह भीष्मो धर्म्मात्मजं यथा ॥२१॥
"व्यसनानि च सर्व्वाणि त्यजेथा भूरिदक्षिण ।
न चैव न प्रयुञ्जीत सङ्गन्तु परिवर्ज्जयेत्" ॥२२॥
इत्थमत्र परिचिन्त्य लाघवं
गौरवञ्च गुणयोगतः पृथक् ।
सङ्गमात्रमपहाय योजयेत्
रञ्जनाय जगतो यथायथम् ॥२३॥

इति श्रीरुद्रदेवविरचिते श्यैनिके शास्त्रे व्यसनहेयाहेयता-
निरूपणो द्वितीयः परिच्छेदः ।

---

१ B एत एते सप्तदशमृगया ।

तृतीयः परिच्छेदः ।

अथेदानीं मृगव्या तु समासव्यासयोगतः ।
एकापि चाष्टधा सैषा बहुधाच निरूप्यते ॥१॥
आमिषाद्यर्थसंसिद्धौ नैकोपायैः सुखाय च ।
हिंसनं प्राणिमात्रस्य मृगयेति प्रचक्षते ॥२॥
हिंसनं प्राणिनां यत्र तत्र दोषपरम्परा ।
यागीयाः पशवः प्रोक्ता ग्राम्यारण्याश्चतुर्द्दश ॥३॥
एषामप्रोक्षितानाञ्च हिंसा दोषाय जायते ।
अस्मिन्नर्थे पुरा श्लोका यथा द्वैपायनोदिताः ॥४॥
पाण्डुकिन्दमसंवादे मृगहिंसाप्रसङ्गतः ।
"शत्रूणां या वधे वृत्तिः सा मृगाणां वधे स्मृता ॥५॥
राज्ञां, मृग, न मां मोहात् त्वं गर्हयितुमर्हसि" ।
अच्छद्मना मायया वा मृगाणां बध इष्यते ॥६॥
अगस्त्यः सत्रमासीनश्चचार[1] मृगयां ऋषिः ।
आरण्यान् सर्व्वदैवत्यान् पशून् प्रोक्षन् महावने[2] ॥७॥
अगस्त्यप्रोक्षणाद्धिंसा मृगव्यायां न वर्त्तते[3] ।
ग्राम्याणां प्रोक्षणं शस्तं यागादिषु यथाविधि ॥८॥
आरण्यानां ह्यगस्त्यस्य प्रोक्षणाच्छस्यते बधः ।
श्रूयन्ते चेतिहासाश्च राज्ञां तस्या निषेवने ॥९॥
व्यायामाच्चोपघाताच्च प्रत्युतायासवेदनं ।
यत्र तत्र सुखायेति व्यर्थस्तत्र कथ्यते ॥१०॥

---

१ B चकार । २ B महामुने । ३ C wrongly प्रवर्त्तते ।

यथा प्रसह्य मानिन्या[१] चुम्बनालिङ्गनादिकम् ।
आयाससाध्यमप्यन्त र्न नाम सुदमश्नुति ॥ ११ ॥
प्रहारो नखदन्तादै र्यथैव स्मरसङ्गरे ।
उपघातस्तथैवात्र रसावेशान् न वा रुजे ॥ १२ ॥
इति सिद्धं लक्षणं हि मृगयायाः पुरोदितम्[२] ।
तस्याः किलाष्टभेदानां विवेचनमथोच्यते ॥ १३ ॥
हरमूर्त्तिरिवावस्थाभेदादेकैव कामिनी ।
यथाष्टधा रसायालं तथैव मृगया मता ॥ १४ ॥
आश्वीनान्या सजालान्या काख्यान्या यावशी परा ।
सापेक्षान्या पदप्रेक्षा तथा श्वगणिका परा ॥ १५ ॥
श्येनपाताष्टमी चैताः क्रमेण परिकीर्त्तिताः ।
[३]स्वलक्षणमथैषां हि तथाकर्त्तव्यतोच्यते ॥ १६ ॥
तुरगैः साधनीभूतैर्विद्रवन्तः शरादिभिः ।
वध्यन्ते हि मृगा यस्यां साश्वीना रसशेवधिः ॥ १७ ॥
अवृक्षकर्द्दमग्रावा नीरन्ध्रा भूः प्रशस्यते ।
कालश्च शिशिराद्धान्तात् ज्यैष्ठार्द्धमपीष्यते ॥ १८ ॥
तस्याः सुसेवनान्मेदश्छेदो वपुषि लाघवम् ।
वलाशोपचयो[४] दार्ढ्यमन्तराग्नेश्च पाटवम् ॥ १९ ॥
क्षुत्तृट्शीतातपालस्यजागरादेः सहिष्णुता ।
चललक्ष्यादिनैपुण्यमुत्साहपरिवर्द्धनम् ॥ २० ॥

---

१ A मानिधन्या ।　　२ C परोदितम् ।
३ B C सलक्षणां ।　　४ A C वलाशापचयो ।

स्वसत्त्वोद्भावनं ज्ञानं सत्त्वानां चित्तचेष्टिते।
इत्यादिकगुणोत्कर्षो जायते चात्मसम्पदे ॥२१॥
तथा धर्म्मार्ज्जनमपि वृकव्याघ्रादिहिंसनात्।
वधेन हरिणादीनां शस्यादीनाञ्च रक्षणात्[1] ॥२२॥
नैककर्म्मोपयोग्यानामटवीनां निरीक्षणात्।
विनाशनाच्च चौराणां तथाटविकरञ्जनात् ॥२३॥
तथार्थोपार्ज्जनं मत्तहस्तिगण्डानुबन्धनात्।
विषाणाजिनकस्तूरिमणिपक्षाद्युपार्ज्जनात् ॥२४॥
वराहलाविकादीनां[2] सन्मांसाभ्यवहारतः।
उद्रिक्तसत्त्वसम्पत्त्या कामोद्रेकोऽपि[3] पुष्कलः ॥२५॥
रसोऽभिमानोऽहङ्कारः कामसर्व्वस्वमुच्यते।
अतो मृगव्याश्रान्तस्य चन्दनाद्यनुलेपनम् ॥२६॥
गात्रसंवाहनं हस्तपद्मैश्च मृगीदृशाम्।
पानकं पञ्चसारादि तालवृन्तानिला मुहुः ॥२७॥
मनसो ह्यभिमानेन यथा सम्बन्धमृच्छति।
अन्यदा न तथा येन तेन कामैकवेदनम् ॥२८॥
स्त्रीमृगव्याभिदा कापि रसपुष्टौ न दृश्यते।
शास्त्रकारैः किलैतावान् सूक्ष्मभेदस्तु दर्शितः ॥२९॥
आभ्यासिकी सम्प्रयोगे प्रीतिश्चानुत्तमा रतौ।
विभावाश्चानुभावाश्च रसाधिक्यात्तयोः समाः ॥३०॥

---

१ C वर्द्धनात्। २ A B C लावक। ३ B कामोत्कर्षोपि।

संयोगविप्रयोगाभ्यां विलोक्यन्ते यथायथम् ।
तेषां स्त्रीविषये व्यासो नाट्यालङ्कारनिर्म्मितौ ॥२१॥
कामशास्त्रादिषु महान् दृश्यते तेन नोच्यते ।
मृगयायास्तु संक्षेपात् परिज्ञानाय कथ्यते ॥२२॥
सोत्कुर्दूराच्छकुन्तादेर्ग्रहः श्येनादिभिः कृतः ।
धन्विनश्च हठाल्लक्ष्ये शरसिद्धिश्चलाचले ॥२३॥
व्यञ्जयत्युत्तमां प्रीतिं अश्रुरोमाञ्चगद्गदैः ।
विच्युतिश्चापि तस्यैव वियोगेनापदिश्यते ॥२४॥
वितर्कस्मृतिवैवर्ण्यविलापादिकरी यतः ।
इत्याद्यूह्यमतः साम्यं मृगयायास्तथा स्त्रियः ।
तेनैषापि त्रिवर्गस्य साधनाय प्रशस्यते ॥२५॥
सम्भूय सावकाशेन प्रसार्य्यानिलसम्मुखम् ।
बलं मृगाभिसारेण सानायासेन सिध्यति ॥२६॥
खड्गाभिसरणे शस्तः पञ्चषा एव सादिनः ॥२७॥
वश्यास्तुरङ्गाः शस्यन्ते शिक्षिता ये गतागते ।
त्वरया पृष्ठतो वेध्यः क्षुद्रशक्त्या तु सादिना ॥२८॥
परावृत्तो यदि भवेत्तदास्य पुरयायिना ।
विस्रम्भात्तु निजाश्वस्य सादिना भाव्यमञ्जसा ॥२९॥
तस्याभिसारे चान्येन वेध्यो भवति पृष्ठतः ।
अथवा पार्श्वतो बाणैर्वेध्यः श्रेष्ठधनुर्द्धरैः ॥४०॥
दृप्तं मृगेन्द्रमपि च तरलाश्वैस्तु धन्विनः ।
लक्ष्यालक्ष्येण लक्ष्येण मार्ज्जारमिव निघ्नते ॥४१॥

सा सजाला कूटवृत्त्या यस्यां निघ्नन्ति वै मृगान् ।
मत्स्यगड्डोद्रसूकीनां बन्धनञ्चापि कुर्व्वते ॥४२॥
नरास्तस्याः साधनानामानन्त्यमुपलक्ष्यते ।
निषादप्रायनीचेषु स्थितिस्तस्या विलोक्यते ॥४३॥
गजबन्धादिसौकर्य्यसिद्ध्ये सातिरिच्यते ।
कारणीया नृपैः सा तु महोदयकरी यतः ॥४४॥
छद्माचरणमप्यत्र न दोषायानुबध्यते ।
अस्मिन्नर्थे वालिवधे यथा वाल्मीकिनोदना[1] ॥४५॥
"वागुराभिश्च कूटैश्च पाशैश्च विविधै र्नराः ।
प्रतिच्छन्ना अदृश्याश्च[2] गृह्णन्ति बहवोऽद्भुतम् ।
विध्यन्त्यभिमुखांश्चापि मृगयाधर्म्मकोविदाः" ॥४६॥
कुरङ्गांश्च कुरङ्गाश्च पक्षिणश्चापि पक्षिणः ।
बध्नन्ति शिक्षायोगेन सजालान्तर्गतैव सा ॥४७॥
काल्या सङ्काल्य बहुभिः पृष्ठतोऽन्यैः पुरःस्थितैः ।
साध्यते या पृथक्कृलीनैश्चतुर्धा सा तु भिद्यते ॥४८॥
तारोच्चारैः काल्यमानाः पुरोवातं द्विभिस्त्रिभिः ।
त्रिकर्णिमोच्चैर्हन्यन्ते एणाः सा बहुकर्णिका ॥४९॥
पृष्ठतो निविडीभूतैः काल्यन्ते यत्र वै मृगाः ।
बध्यन्ते पादपच्छन्नैर्यत्र सा मूललग्निका ॥५०॥
सुदूराद् वर्त्तुलीभूय क्रमात् सङ्कोचमागतैः ।
एकत्र प्रतिसंरुद्धा नैकजात्युद्भवा मृगाः ॥५१॥

---

१ A B ०नोदनात् । २ B सदृश्यांश्च ।

बध्यन्ते करवालाद्यै र्बङ्गभि र्यत्र नैकधा ।
महाकाल्येति सा प्रोक्ता सिध्यते सा नृपादिभिः ५२॥
अपरा गजकाल्येति साध्यते साश्वसादिभिः ।
ग्रीष्मर्त्तावेव विरलीभूतवार्य्युपरोधनात् ॥५३॥
चतुर्व्विधायाः काल्यायाः साधने कुशला जनाः ।
युज्यन्ते कालने मोचे शराणाञ्चान्यथा नृणाम् ।
वृथायासो भवेद्भ्रंसः स्वौयेष्वेवानुदृश्यते ॥५४॥
निर्घातयवशस्यादिस्पन्दनामात्रसूचिताः ।
बध्यन्ते यत्र वै बध्या यावशी सा प्रकीर्त्तिता ॥५५॥
द्वित्रैरेवाश्ववारैश्च शरमोचविशारदैः ।
सा सिध्यति शनैश्चारात् शस्य[१]स्पन्दोपलक्षणात् ॥५६॥
नात्यायासकरी सा तु प्रमोदायोपजायते ॥५७॥
मृगाद्यपेचामालम्ब्य लीनो यत्रैक एव वा ।
धन्वी विध्यति दिग्धेन सा सापेक्षा स्मृता बुधैः ॥५८॥
विभीतकादौ चेत्रे वा निपाने सा तु सिध्यति[२] ।
गोशवादिषु सिंहादेर्बधाय सुखसिद्धिदा ॥५९॥
पदमार्गानुसारेण बध्यन्ते यत्र वै मृगाः ।
पदप्रेक्षा च सा प्रोक्ता द्विधा सापि प्रयुज्यते ॥६०॥
[३]कुक्कुरैः परितोऽन्विष्य चिरमायास्य कर्कशम् ।

---

१ C षस्यग ।   २ C सिद्धिदा ।
३ C विद्राव्य सारमेयैस्तु धन्विनः एष्टगाः स्वयं ।
घ्नन्ति श्रान्तान् मृगान् यत्र स्वपदप्रेक्षिका तु सा ।

बध्यते हि मृगो यस्यां श्वपदप्रेचिका हि सा ॥६१॥
यत्र धन्वी प्रयत्नेन स्वयमन्विष्य कौशलात् ।
सुप्तं सुप्तोत्थितं वापि हन्ति सा पूर्व्वशब्दिता ॥६२॥
ते च द्वे सैकतप्राये सानूपे वाथ यत्नतः ।
वर्षर्त्तावतिसिध्येते चान्यदातिश्रमात् पुनः ॥६३॥
ऊषरादिस्थले यस्यां लक्ष्यीकृत्योपवाहिताः ।
गृह्णन्ति शशकादींश्च श्वानः श्वगणिका स्मृता ॥६४॥
शुनां सुखपरिक्षेपः सिद्ध्यसिद्धौ शशश्रुतौ ।
पतनोत्पतनाभ्यां द्वे हास्यपुष्टिविधायिके ॥६५॥
तेषाञ्च घुर्घुरोद्दामरावेिणि प्रतिधावताम् ।
काले तद्रौद्रपर्य्याप्ते दन्तादन्ति नखानखि ॥६६
[1]दिशस्त्रिशः सावकाशाद्रज्जुमोचविशारदैः ।
लक्ष्यमुद्दिश्य च शुनां मोकस्तत्सिद्धिकारकः ॥६७॥
तस्यां शराणां सहसा मोचो नान्यत्र शस्यते ।
बाधमानमपास्यैकं कोलं कौलेयसिद्धये ॥६८॥
दण्डापि[2] सा त्वर्थयुक्ता[3] प्रयोक्तव्या शशादिषु ।
एवं सापि प्रमोदानामास्पदं परिकीर्त्त्यते ॥६९॥
[4]अस्या एव भिदा कापि कृष्णसारे रुरौ हि यः ।
मोकोऽतिरसकृद्येन रज्ज्वा मोकोऽपि स स्मृतः ॥७०॥
यस्यां तज्ज्ञैर्द्विधा मुक्ताः पतत्रिषु पतन्ति च ।

---

१ C puts this verse after the next. २ B दांडा ।
३ A B ०युक्तया । ४ C omits this verse.

श्येनाः, मातीव रसभूः श्येनपातेति कथ्यते ॥७१॥
श्येनपाता मृगव्येति स्वैरं वान्यस्य वा भवेत् ।
स्वैरमारण्यकानाञ्चेत् मृगव्येति निरर्थकम् ॥७२॥
मृगान् शशादा गृह्णन्तीत्येवं यदि सदर्थकम्[१] ।
तदा सिंहादिषु पुनः कथं नैतत्प्रयुज्यते ॥७३॥
यत्रानेकार्थसमक्तत् मृग्यन्ते प्राणिनः पराः ।
सा मृगव्येति निर्द्दिष्टा सा तिरश्चां न विद्यते ॥७४॥
ते तु स्वोदरपर्य्याप्तिमात्रमांसाय केवलम् ।
हिंसन्ति[२] न तु चैतेषां अर्थोऽन्यत्रानुबध्यते ॥७५॥
न केवलं मृगव्याया ह्यर्थो मांसार्थमात्रकः ।
यतो मुक्ताजिनादीनां कस्तूर्य्यादेः समुद्भवः ॥७६॥
दृश्यन्ते हस्तिबन्धाश्च तेन नानार्थसिद्धये ।
अन्विष्यते प्राणिजातं मृगयेत्युच्यते ततः ॥७७॥
अतो नृभिः प्रयुक्तानां तेषां पातोऽत्र कथ्यते ।
तेनाष्टमी मृगव्यैषा श्येनपाता निरूपिता ॥७८॥

एतस्या विशदतया किलाष्ट भेदा
निर्द्दिष्टाः पुनरपरे ह्यवान्तरा ये ।
ते सर्व्वे रसजननाय नैकरूपाः
कल्प्यन्ते विहितविधानसम्प्रयोगात् ॥७९॥

इति श्रीरुद्रदेवविरचिते श्यैनिके शास्त्रे मृगयाविवेचनस्तृतीयः परिच्छेदः ।

---

१ B omits this line.   २ निघ्नन्ति ।

चतुर्थः परिच्छेदः।

मोकाद्याचारसम्पन्ना श्येनलक्षणलक्षिता।
विश्रम्भणाद्युपायैश्च विहिता सा निगद्यते ॥१॥
हस्तमुष्टिप्रभेदेन मोको द्विविध उच्यते।
यत्राङ्गुलीभिः सर्व्वाभिः [1]श्येनपत्याग्रपीड़नम् ॥२॥
विधाय क्रियते मोको हस्तमोकः स उच्यते।
कुह्यादिष्वयमेवोक्तो वासादिष्वपि शस्यते ॥३॥
वस्त्रान्तरितमावेश्य तलोपरि यथाबलम्।
असङ्गवत्परीक्षेपो मुष्टिमोकः प्रकीर्त्तितः ॥४॥
असक्तं लघु मोक्तारं गतानुगतमञ्जसा।
प्रशस्यते द्विधा मोको दूरे दूरे यथायथम् ॥५॥
तेषां विश्रम्भणं पूर्व्वं यथावदिह कथ्यते।
आदौ विसुद्रयेन्नेत्रे सौवनेन विचक्षणः ॥६॥
यथा न सुखमीक्षेत यथा वा[2] प्रतिशीर्षकैः।
शब्दञ्च श्रावयेन्नैव यावद्दिवसपञ्चकम् ॥७॥
ततः प्रतिनिशं किञ्चित् सालोके दीपिकादिभिः।
नेत्रे निर्मुच्य[3] पानीयैः क्षालयेत् सुखशीतलैः ॥८॥
किञ्चित् किञ्चित् परिचयं कारयेत् श्रावयेत् वचः।
एवं क्रमेण हस्तादिस्पर्शैर्वाक्योपलालनैः ॥९॥
विभक्तकाले पानीयमांसदानेन सान्त्वनैः।
छायातपोपशमनैः क्रमान्नेत्रोपमोचनैः ॥१०॥

१ A श्येनवत्०। २ A B तथा वा। ३ A C निर्म्मुच्य।

कृत्वा रक्तापरक्तत्वं ज्ञेयस्तेषां विचेष्टितैः ।
नेत्रे निमील्य तिष्ठन्ति चैकपादेन वै यदा ॥११॥
चञ्च्वा कण्डूयनञ्चैव पक्षपाल्योर्विधूननम् ।
आस्यावलोकने सौम्यां दृष्टिं सञ्चारयन्ति च ॥१२॥
तदा रक्तास्तु विज्ञेया विरक्तास्त्वन्यथा तु ते ।
रक्तान् ज्ञात्वा रज्जुयुक्तानाकर्षेदामिषादिभिः ॥१३॥
क्रमेण वर्द्धयेद्भूमिमाकर्षेच्च दिशः चिशः ।
यदाह्वाने नो विलम्बं कुर्य्युस्तिर्य्यङ्‌ वा गतिम् ॥१४॥
न मांसादेस्तथा कृष्टिं तदा रज्ज्वा विनाकर्षेत् ।
ततो वृक्षाद्युपरि च प्रक्षिप्याह्वाययेत् क्रमात् ॥१५॥
कलविङ्ककपोतादिपतत्त्रिग्रहणं पुनः ।
कारयेत् पूर्व्वसंस्कारस्मारणाय यथायथम् ॥१६॥
क्रमेणानेन ये न स्युर्वश्यास्तानतिजागरैः ।
अत्यन्तकरसंयोगैः कर्षणैश्चानयेद्वशम् ॥१७॥

तेषां जात्यनुरूपा च रञ्जनाय क्रिया मता ।
अतोऽनुवक्ष्ये श्येनानां पृथग्जातिविवेचनम् ॥१८॥
कृष्णाक्षा पाटलाक्षा च जाती द्वे प्रस्फुटान्तरे ।
तयोश्चावान्तरा भेदा लक्ष्यन्तेऽन्येऽपि भूरिशः ॥१९॥
तेषां नामानि कथ्यन्ते जातानां जातिमुख्ययोः ।
कुही-शशाद-चरक-वहरी-लगरास्तथा ॥२०॥
तथान्या पक्षकलिका तथा तुरुमुती परा ।
पुंव्यक्तयश्च तत्सञ्ज्ञाः कृष्णाक्षजातिजो गणः ॥२१॥

एषोऽतिजागरैः साध्यः सुपानीयामिषाशनः।
कार्य्या सुखे शिलाक्षेपस्तथा हस्तादिदंशने ॥२२॥
विश्रम्भस्ताक्षुषस्तस्य क्षिप्रमेव प्रजायते।
आभ्यन्तरस्तु कष्टेण तस्माद् युक्त्या वशं नयेत् ॥२३॥
आक्रान्तं पक्षबन्धेन वाससा वा प्रकल्पयेत्।
आगते देयमशनं यथा नाशा विहन्यते ॥२४॥
वाग्दण्डैश्चार्थदण्डैश्च किञ्चिदाश्वासनैस्तथा।
स्थाप्यन्ते स्ववशे दुष्टा यथैवैष[1] गणस्तथा ॥२५॥
अतिपुष्टस्तु[2] विकृतिमशक्तिमतिकर्षितः।
सम्पद्यते यथा नीचस्तथैवैष गणः स्मृतः ॥२६॥
प्रत्याशावर्द्धनोपायैर्दानैः कर्म्मानुरूपतः।
रञ्जिता रञ्जनायालं भृत्या इव भवन्ति ते ॥२७॥
दूराक्रान्ते दूरपाते[3] स्थूललक्ष्यविनिग्रहे।
प्रशस्त एष हि गणो द्वितीयः कथ्यतेऽधुना ॥२८॥
पञ्च वाजस्कद इति पर्य्यायकथनोक्तयः।
भवन्ति तेन सामान्यं वाजवत्त्वं पतत्रिणाम् ॥२९॥
यथाश्वत्थाम्नि कर्णे च भीष्मे पार्थे च रुक्मिणि।
सामान्ये सव्यसाचित्वे वैशिष्ट्यादर्ज्जुनेऽभिधा ॥३०॥
तथैव वाजवत्त्वेऽपि सामान्ये सर्व्वपक्षिणाम्।
श्येने पक्षीति वाजीति शब्दो वैशिष्ट्यसूचकः ॥३१॥
वाजा वासा वेसराश्च शिक्रानाश्च चतुर्व्विधाः।

---

१ A B वैष। २ C अतिदुष्टः। ३ C दूरयाने।

जूराश्वेटा धूतिटुनास्तथा पुंव्यक्तयस्त्वमी ॥२२॥
उभयोर्गणयोस्त्वेषां स्त्रीणां प्राधान्यमूर्ज्जितम् ।
संस्थाने साहसे मूल्ये पचपातादिसौष्ठवे ॥
वाजाद्यास्तु प्रधानत्वात् पुंलिङ्गे व्यपदेशिताः ॥२३॥

वाजिनः पञ्चधा तेषां पृथक्लचणमुच्यते ।
कृशाकृतिर्बलाकाचः श्वेतकृष्णकपर्द्दिकः ॥२४॥
भवत्यङ्गे तयोर्व्वास्तु सुखसाध्यः प्रकीर्त्तितः ।
यस्तुक्रवाकसंस्थानस्त्रक्राङ्गः स च कीर्त्तितः ॥२५॥
प्रलम्बः कृष्णसंस्थानः कङ्काभः कालकः स्मृतः ।
चिरादिश्रममभ्येति सुरक्तोऽपि विरज्यते ॥२६॥
यः सर्व्वाङ्गे हिमप्रख्यो हंसवाजः स कथ्यते ।
स यत्र पूजितस्तिष्ठेत् कल्याणं तत्र जायते ॥२७॥
तं प्रयत्नेन रचेत्तु नाच्खेड़ादिषु[1] योजयेत् ।
तस्य स्पर्शेन नश्यन्ति ज्वरास्त्रातुर्थिकादयः ॥२८॥
यस्याश्वत्थदलप्रख्या लेखा पुच्छच्छदादिषु[2] ।
जायते वाजराजोऽसौ महारावणसंज्ञकः ॥२९॥
स महापुण्यनिचयैः प्राप्यते कौतुकास्पदम् ।
रावणात् पचिमङ्गानां महारावण उच्यते ॥४०॥

श्रौरङ्गना धावनास्तु प्रतिष्ठानास्तथैव च ।
शिकाराश्चेति वासानां चतुर्धा जातिरुच्यते ॥४१॥
श्रौरङ्गना बहुविधा भवन्त्युच्चावचा अपि ।
विक्रमे साहसे चैव वर्णैरपि पृथग्विधाः ॥४२॥

---

१ C आखेटा० । २ C पक्षच्छटा०, A पुच्छच्छटा० ।

धावनाः सूक्ष्मकायाश्च सुकुमारा जवाधिकाः ।
पक्षप्रायाः प्रतिष्ठाना मन्दा वेगे च साहसे ॥४३॥
अरोगा बद्धपिण्डाश्च वाजदेशसमुद्भवाः ।
श्वेताभा गैरिकाभाश्च कृष्णाभा वर्णतः स्मृताः ॥४४॥
सुशीला जवना हिंस्राः शिकाराश्चण्डसाहसाः ।
च्योतन्त इव पीयूषं दृशोः संस्थानसौष्ठवैः ॥४५॥
प्राप्यन्ते तेऽतिसुकृतैः शिक्षासंस्कारशालिनः ।
नानातिजागरायासैः क्लेशयेल्लालयेन्मुहुः ॥४६॥
पुष्टानेव मृगव्यायां योजयेन्मनसो मुदे ।
वेसरास्त्रिविधास्तेषां पृथङ्नामाभिधीयते ॥४७॥
स्थूलोऽधमो माणिकस्तु चूलिकाङ्कस्तु मध्यमः ।
शुङ्कस्तु वासाप्रतिमः पक्षाधिक्येऽपि साहसे ॥४८॥
अनेकदेशजन्मानस्तेन देशस्वभावतः ।
नानासंस्थानचेष्टाभिः सिचाना नैकधा स्मृताः ॥४९॥
पुंव्यक्तयोऽपि चैतेषां लक्षणैरुपलक्षिताः ।
भवन्ति ते च विस्तारभयान्नात्र प्रदर्शिताः ॥५०॥
शीर्षं फणिफणाकारं शस्तं ग्रीवा तथोन्नता ।
पक्षती चायते वक्षो विस्तीर्णं सर्व्वपक्षिणाम् ॥५१॥
ह्रस्वे च नलिके तद्वद्वृत्तपीने सुबन्धने ।
आयताङ्गुलिसुश्लिष्टसन्धिबन्धौ करौ मतौ ॥५२॥
उदग्रनखरौ चैषामासनं[1] स्वस्तिकाकृति ।
एतानि लक्षणान्येषां सामान्यानि विजानते ॥५३॥

---

१ A च्चांशनम् ।

वामा मधुरवाक् धन्यो वाजी मूकोऽतिशोभनः।
कुहो यस्याः कण्ठिका हि कर्णान्ता रजताकृतिः ॥५४॥
पक्षमत्कारसम्पुष्टा लालनैश्चानुरञ्जिताः।
भवन्ति वाञ्छितार्थाप्त्यै श्येनाः सुसचिवा इव ॥५५॥
पक्षी विनेतुरसमं बुद्धिकौशलवैभवम्।
राज्यतन्त्रविधानज्ञो वा[1] जानाति न चेतरः ॥५६॥
यत्र लब्धोपशमनमलब्धार्थोपचिन्तनम्।
दुष्टानां कर्षणं युक्त्या विनीतानाञ्च पोषणम् ॥५७॥
उत्साहवर्द्धनं कामपूरणैः कृतकर्म्मणाम्।
रञ्जनं रक्षणं शश्वत् रक्तारक्तपरीक्षणम् ॥५८॥
विश्वासनमविश्वासो नेत्रचेष्टानिरूपणम्।
साध्यसाधनयोर्ज्ञानं शक्याशक्यविवेचनम् ॥५९॥
ज्ञात्वा नियोजनं योग्ये तथायोग्यान्निवर्त्तनम्।
इत्याद्यूह्या गुणा ये च राजधर्म्मे प्रदर्शिताः ॥६०॥
तत्र ते श्यैनिके शास्त्रे विचीयन्ते मनीषिभिः।
यथावकाशं हि रसा नाट्यादौ ये विनिर्म्मिताः ॥६१॥

इत्याद्यनेकरसभावनया गभीर-
मापामरादिसुखसेव्यतया सुबोधम्।
संक्षिप्तयुक्तिरचितं परिशीलयन्तु
ते श्यैनिकन्तु मृगयाऽभिमता हि येषाम् ॥६२॥

इति श्रीरुद्रदेवविरचिते श्यैनिके शास्त्रे श्येनानां विवेचनं परिच्छेदः चतुर्थः ॥

---

[1] A B वि।

पञ्चमः परिच्छेदः ।

तेषामाहारमात्रायाः परिमाणमथोच्यते ।
कालचर्य्या तथा रोगपरीक्षानिग्रहावपि ॥१॥
पञ्चविंशतिटङ्कैस्तु मात्रा शुद्धामिषस्य या ।
कुहीचरकवाजानां बहरीणाञ्च सा भवेत् ॥२॥
शशादा नाल्पमात्रार्हा लङ्घनेऽपि तथाक्षमाः ।
जातिमात्रेण निर्दिष्टास्तेषां क्रीड़ा तु नोहिता ॥३॥
तैः पञ्चहीनां तासान्तु पुंव्यक्तीनां प्रयोजयेत् ।
पचकाकलिकायास्तु पञ्चहीना ततो भवेत् ॥४॥
ततो द्विहीना वाशानां द्विहीनां पुनरादिशेत् ।
शुद्धानां वेसराणान्तु चूलाङ्कानां पुरोदिताः ॥५॥
तावन्मात्रा सिचानानां यथासात्म्येन कल्पिता ॥६॥
तथा तुरुमुतीनान्तु नवटङ्कैः प्रकल्पिता ।
चेटाटोनाधूतिकानामेकद्वित्रिक्रमात् क्रमात् ॥७॥
प्रकल्पयेदिमां मात्रां दिवारन्तेषु योजयेत् ।
यथा वेतनभक्तस्य यथायोग्येन कल्पना ॥८॥
शस्यते कालपातोऽपि तन्नक्षोभाय कल्पते ।
तथैषां कालपातोऽपि नाहारेषु प्रशस्यते ॥९॥
वैषम्यमपि मात्राया वैगुण्यमुपपादयेत् ।
मात्रैषा हि मृगव्यायां नियुक्तानां प्रकीर्त्तिता ॥१०॥
पक्षमोक्षाय ज्यैष्ठादावन्यां मात्रां प्रकल्पयेत् ।
ग्रीष्मे प्रचण्डमार्त्तण्डतापसन्तापिता दिशः ॥११॥

न भान्ति तरवश्चैव शीर्णपर्णैरनाश्रयाः।
झञ्झानिला धूलिजालैराविला वान्ति सर्व्वतः ॥१२॥
पयांसि क्वथितानीव स्रोतस्विन्यः स्रवन्ति च।
प्रतप्तरेणुदुष्पर्शा रसा तेनेह जन्तवः।
निर्वैरा विगतोत्साहा लक्ष्यन्ते ज्वरिता इव ॥१३॥
पतत्रिणस्तारतारैः रुवन्ति करुणस्वरैः।
विशेषेण स्रवद्वारिधौतामलशिलाचिताः ॥१४॥
भिन्नेन्द्रनीलसङ्काशसूक्ष्मशष्पसमाचिताः।
स्रवत्सरलनिर्यासमुरभीकृतमारुताः ॥१५॥
उपत्यका हिमगिरेर्येषां परिचयं गताः।
तेषां दावाग्निसङ्काशो ग्रीष्मो भवति दुःसहः ॥१६॥
अतस्तापोपशमनान् उपचारान् प्रयोजयेत्।
तेषां प्रासादशिखरे सुधाधवलितोदरे ॥१७॥
यन्त्रनिर्मुक्तपर्य्यन्तपानीयासारशीतले।
जनैर्व्यजनहस्तैश्च दूरतो जनितानिले ॥१८॥
विविक्ते बन्धनं कार्य्यं जालसंरुद्धमक्षिके[1]।
अथवोद्यानसद्वेद्यां रचितायां सुरुचिभिः ॥१९॥
[2]सरत्कुल्याम्बुशीतायां निविडोच्छ्रितभूरुहैः।
चण्डांशुकरसञ्चाररहितायामनारतम् ॥२०॥
[3]अधोशीरपरिन्यस्तपानीयसुरभीकृते।

---

१ C ०मस्तके। २ C रसत्०। ३ A B ०वति।

परितो वापितोद्भूतयवाङ्कुरविराजिते ॥२१॥
निर्दंशमशके रम्ये भूगृहे बन्ध दृश्यते।
स्थानं विलोचनानन्दजननं घ्राणतर्पणम् ॥२२॥
समावृतप्रचारन्तु सावकाशं प्रकल्पयेत्।
नैकत्र बहवः स्थाप्याः द्वित्राः स्थाप्याः पृथक् पृथक् ॥२३॥
न च [1]तेभ्यः सुशीताम्बु वारंवारं प्रदर्शयेत्।
वाजादिकलविङ्कादेर्मांसं नातिचिरस्थितम् ॥२४॥
लघु हृद्यं[2] प्रदातव्यं यथा परिणमेत्तथा।
पुष्ट्यै प्रवर्द्धयेदेषां मात्रामथ शनैःशनैः ॥२५॥
स्नानार्थं वारिपूर्णाश्च स्थापयेत् कुण्डिकाः पुरः।
भुक्तं यद्युद्गिरेयुस्ते मांसमेषां तदौषधम् ॥२६॥
माहिष्या नवनीतेन मेथिकाचूर्णमिष्यते।
भुक्तं परिणमेन्नैषां यदि देयं तदामिषम् ॥२७॥
सद्योहृतञ्च[3] मद्याम्बुसिक्तं चन्द्राङ्कसंयुतम्।
प्रदेयमथवा वह्निचूर्णं तदुपशान्तये ॥२८॥
किंवा भङ्गारसोन्मिश्रं पश्चात् तप्ताम्बु पाययेत्।
युक्त्या यथा नोद्विजेरन् युक्तिः सर्व्वत्र साधिका।
कार्श्यं यदि भजेयुस्ते तदा स्त्रीस्तन्यसंयुतम् ॥२९॥
प्रदेयं नवनीतेन धेन्वा वा मांसमिष्यते।
चुद्बोधाय लवङ्गेन नरमूत्रेण वा पुनः ॥३०॥

---

१ C तत्र। २ C भव्यं। ३ C ०हृतश्च।

एवं क्रमेण चुद्वृद्धिं विधाय परिवृंहयेत् ।
मात्रासंवर्द्धनैर्नित्यमुपचारैः सुशीतलैः ॥२१॥
अथाम्बुदकृतध्वाने विद्युदुद्योतदीपिते ।
मालतीजनितामोदप्रमोदे सर्व्वदेहिनाम् ॥२२॥
दर्दुरारावविरुते शिखण्डिकृततारण्डवे ।
कदम्बामोदपिशुने श्वसने वाति सर्व्वतः ॥२३॥
सर्व्वत्रासारसञ्चारकलुषे सरिदम्बुनि ।
झिल्लीझङ्कारवाचाले काले प्रावृषि चागते ॥२४॥
तथैवोपचरेत्तांस्तु यथा पुष्टाः खपत्त्रकान्[1] ।
त्यक्त्वा नवान् प्रपद्येरन् सर्पास्त्वचमिव द्रुतम् ॥२५॥
यदि कालात्ययं कुर्य्युः पत्त्रमोत्ताय सामिषम् ।
शरटामिषमप्येके पत्त्रमोत्ताय जानते ॥२६॥
गडूपं गोमहिष्यादेर्द्ददते म्लेच्छजातयः ।
नैर्घृण्याद्वेगमान्द्यादिकरणान्नैष शस्यते ॥२७॥
कृमयो यदि पत्त्राणि च्यावयन्ति तदौषधम् ।
विडङ्गवह्निकस्तूरीसमभागैः प्रदापयेत् ॥२८॥
द्विरत्तिमात्रमथवा सैन्धवं स्थूलपक्षिणाम् ।
लघूनां रत्तिकार्द्धन्तु समांसं दिवसत्रयम् ॥२९॥
तज्ज्ञैः सुशिक्षिताः श्येना भवन्त्यानन्ददायिनः ।
अतः सुखविघातार्थं नृणां प्रागदृष्टदोषतः ॥४०॥

---

१ C खपूच्छकान् ।

तेषामपि भवन्तीह रोगास्तस्माच्च शान्तये।
तेषाञ्चोद्दिशतो वच्येऽनिग्रहायौषधक्रमम् ॥४१॥
चतुर्धा श्वासवैषम्यवृत्तिः शाखेति कथ्यते।
अभिघातसमुत्थैका श्लेष्मजान्या च पित्तजा ॥४२॥
शैत्यजान्या शोषितेति कृच्छ्रसाध्या तु सा स्मृता।
एषां शाखारुजार्त्तानां अन्धकारेऽतिनिर्ज्जने ॥४३॥
दद्यते स्थानमल्पाल्पमामिषं साम्बु दापयेत्।
घातजे वोलयुग्मांसं देयं गात्रेऽपि सव्यथे ॥४४॥
हरिद्रां लेपयेद् युक्त्या सेकः पर्य्युषिताम्बुना।
श्लेष्मजे मारिचं चूर्णं नस्ये प्राक् संप्रयोजयेत् ॥४५॥
शिग्रुत्वक्चूर्णयुङ्मांसं देयं तन्नाम्बु पाययेत्।
कस्तूरिकापि देया तु तदुपद्रवशान्तये ॥४६॥
पित्तजे घनसारेण लवङ्गोशीरचन्दनैः।
समांसैर्गुटिका देया मांसात् प्रागेव युक्तितः ॥४७॥
पश्चान्मांसं वर्त्तिकादेर्देयमल्पं सवारि च।
शैत्यजा दुर्द्धरा प्रोक्ता तथापि सम्मुदीर्य्यते ॥४८॥
क्रियाः किलायुषः शेषे फलन्त्यपि सुयोजिताः।
शस्यते कलविङ्कादेर्नरास्टक्सिक्तमामिषम् ॥४९॥
अथवा पूजनायास्तत्कालीनं सम्प्रयोजयेत्।
किटेरपि प्रयोक्तव्यमल्पमल्पं यथाबलम् ॥५०॥
धेन्वास्र नवनीतेन पच्चिणां मिश्रमामिषम्।
दद्यात्तन्नाम्बु युक्त्या च ततस्तदनुपाययेत् ॥५१॥

कर्पूरसंयुतं वारि काले काले प्रदापयेत् ।
अथैषां शाखिनां शस्ता शिमायी या प्रकीर्त्त्यते ॥५२॥
स्थूलानां श्याम‌नेत्राणां रक्तिकात्रितयं भवेत् ।
मात्रान्तेषान्तु सूक्ष्माणां तदर्द्धमुपकल्पयेत् ॥५३॥
स्थूलानां पाटलाक्षाणां मात्रा द्वे कृष्णले स्मृता ।
सूक्ष्माणां कृष्णलैका तु मात्रा भवति चौषधे ॥५४॥
स्तन्यं भङ्गारसोन्मिश्रं मांसेन सह योजयेत् ।
अञ्जयेच्चाक्षिणी नित्यं दन्तचर्व्वितजीरकैः ॥५५॥
त्रिसप्तकदिनान्येव युज्यन्ते सर्व्वशाखिनां ।
मागधीरजनीवोलं शिमायी-खर्जि-पाटला ॥५६॥
एषां चूर्णं वस्त्रपूतमजाक्षीरसमन्वितम् ।
मांसेन शाखिनां देयमेकविंशतिवासरम् ॥५७॥
शिग्रुमूलत्वचश्चूर्णं अर्कक्षीरेण मेलितम् ।
मांसेन देयं सर्व्वेषां शाखिनां दिनसप्तकम् ॥५८॥
पतन्ति तापात् धूमाच्च घातात् पुष्पाणि नेत्रयोः ।
चाङ्गेरीमूलचूर्णेन श्लक्ष्णेनापूरयेद्दृशौ ॥५९॥
मुच्यते पुष्पकैः श्येनस्तथाष्टादशभिर्दिनैः ।
अथवा रजनीनिम्बपत्राणि मरिचानि च ॥६०॥
अभयापिप्पलीमुस्ताविड़ङ्गैः सममेलितैः ।
अजामूत्रेण वटिकां छायाशुष्कां विधाय च ॥६१॥
पाटले मधुना योज्या पुष्पके स्तन्ययोगतः ।
नाशयत्येव वटिका यथा रुद्रेण निर्म्मिता ॥६२॥

पानभोजनवैषम्यात् पित्तोद्रेकाच्च नेत्रयोः।
शोफः सञ्जायते वर्त्मे तथा पाकश्च दुर्द्धरः॥६३॥
श्लेष्माधिक्यादपि तथा दुश्चिकित्स्यः प्रजायते।
चौरिण्याः स्फटिकाचूर्णं तिलतैलेन मेलितम्॥६४॥
पूर्व्वजे मांसमद्दितं देयं लेपोऽपि शस्यते।
श्लेष्मजे तु शिरे वेध्ये तप्तलौहशलाकया॥६५॥
मुखपाके नृमूत्रेण मिश्रं मांसं प्रशस्यते।
ततः प्रक्षालनमपि कार्य्यमास्यविशुद्धये॥६६॥

बन्धकाठिन्ययोगाच्च भयादुत्पतनान्मुहुः।
जायते सव्रणः शोफः पदयोर्गर्द्दभीति सा॥६७॥
कालातिपातात् पदयोः सैव चांदीति कथ्यते।
पिप्पलौदुम्बरे चीरे मेलयित्वा विलेपयेत्॥६८॥
चरणौ गर्द्दभीशान्त्यै सप्तवासरमन्वहम्।
शान्तिमभ्येति तेषां हि विट्प्रलेपेन वा पुनः॥६९॥
जलूकां पातयित्वा[१] तु निशासैन्धवसंयुताम्।
नवनीतेन तु स्विन्नां लिप्वा वस्त्रेण वेष्टयेत्॥७०॥
दिनत्रयं तदुन्मुच्य पुनरेवं प्रलेपयेत्।
द्वादशाहं प्रलेपेन मुच्यते चांद्यपि स्फुटम्॥७१॥

आघाताद्धीयमानो यो[२] लक्ष्यते बलवर्णतः।
तस्यौषधमिदं देयं वक्ष्यमाणमतन्द्रिणा॥७२॥

---

१ C जलौकां पातयित्वा तु। २ C नो।

द्वे निशे तुल्यकं भार्गी मदनं चार्कजं पयः ।
एते सर्व्वसमासेन मेलखिलामिषेण[१] च ॥१४॥
दातव्यं हि यथा मात्रा त्रिसप्तकदिनावधि ।
क्लिष्टात्पर्य्युषिताच्चैव दुर्जरादामिषाशनात् ॥१४॥
नानाविधा हि कृमयो दृश्यन्ते तेषु योजयेत् ।
द्विभागेन विडङ्गानि कस्तूरीं चैकभागतः ॥१५॥
मेलयित्वा पाययेत युक्त्या तद्रोगशान्तये ।
भयादस्नायिनां गात्रे लिचा यूकाः पतन्ति च ॥१६॥
तेषां नाशाय मागध्याश्चूर्णनोद्धूलनं हितम् ।
विल्वमूलत्वचञ्चापि पिष्ट्वा गोमूत्रवारिणा ॥१७॥
तल्लेपादेव नश्यन्ति यूका लिख्या न संशयः ॥१८॥

इत्यगदैरुदितैरुपचारैः
संविहितैः सुहितैश्च यथावत् ।
रोगविमुक्ततया परिपुष्टान्
वीक्ष्य ततो विनयेन्मृगयायै ॥१९॥

इति श्रीरुद्रदेवविरचिते श्यैनिके शास्त्रे चिकित्साधिकार-
परिच्छेदः पञ्चमः ।

---

१ A क्लिषेया च।

षष्ठः परिच्छेदः।

अथैवमगदाद्यैश्च पूर्व्वोक्तैर्बृंहणीयकैः।
हृष्टान् पुष्टान् समालक्ष्य नूतनच्छदशोभितान्॥१॥
नीलेन्द्रमणिसङ्काशपक्षतिभ्यां विराजितान्।
मुक्ताजालैरिवोरस्थपक्षराजिभिरञ्चितान्॥२॥
निर्म्मुक्तोरगसङ्काशान् पट्टपाशोपयोजितान्।
ग्रीविकारत्नपदिकामञ्जरीपिञ्जरीकृतान्॥३॥
किङ्किणीरावमुखरान् कृत्वा तु सुदिने पुनः।
पूर्व्वोक्तविधिना रक्तान् विधायाश्राययेत् पुनः॥४॥
पूर्व्वसंस्कारबोधाय रज्जुयन्त्रितपक्षिषु।
परिपातं शिक्षयीत पक्षरक्षाविशारदः॥५॥
ये श्येना नीड़निलया लब्धाः प्राग्बन्धपोषिताः।
ताननभ्यस्तसंस्कारान् पतत्रिपरिपातने॥६॥
बहुधा शिक्षयेत् प्राज्ञः पाटवक्रमवर्द्धनैः।
सुशिष्या इव ते श्येनाः शिक्षां गृह्णन्ति सत्वरम्॥७॥
सम्यक् सुशिक्षितानान्तु श्येनानां मरुतामिव।
नाकार्य्यं विद्यते किञ्चित् नासाध्यं योग्यवस्तुषु॥८॥

सञ्चारयेयुस्तान् हस्तैर्युवानो मृष्टकुण्डलाः।
सुवेशाश्चारुवसनाः शिक्षिता बहुधाध्वरम्॥९॥
शिक्षावैशद्यमालक्ष्य तदेषां स्वयमीश्वरः।
द्रष्टुं विनोदं निर्गच्छेत् आखेटोदितवासरे॥१०॥

यामिन्याः प्रथमादेव यामादुदयशालिभिः ।
प्रातरेव शरन्मेघैर्यायाद्वृद्धे दिवाकरे ॥११॥
दूरसञ्चारितानेकसेनो रुद्धान्यसञ्चरः ।
स्वयं विरलविख्यातवीराप्तप्रायसंवृतः ॥१२॥
कविकारज्जुविन्यस्तसमस्तगतिपाटवैः ।
मुरजध्वानविन्याससचरणन्याससालिभिः ॥१३॥
वाह्यमानः स्वयं स्वश्वैः श्येनवाहैश्च संयुतः ।
प्रच्छाये भूधरेन्द्राणां यथाकालमतन्द्रितः ॥१४॥
अथवा यामशेषे तु वासरे मृगयामियात् ।
शरत्काले पृष्ठतोऽर्कं कृत्वा दूरे तु नो स्थितम् ॥१५॥
उपत्यकायां मृगयां यद्युपेयात्सदाभितः ।
प्रचारयेत् पदातींश्च गिरिद्रोण्यन्तरादिषु ॥१६॥
तत्रस्थास्ते च पश्येरन् पक्षिणामपि सर्व्वतः ।
उड्डीयान्यत्र पतनं निलीयानन्तराः स्थलीः ॥१७॥
समायां भुवि विस्तारो मार्गणे सादिनां भवेत् ।
विषमायान्तु पत्तीनां गिरिकूटे शुनां पुनः ॥१८॥
मध्ये श्येनधरो नेता पार्श्वयोर्द्वौ च सैनिकौ ।
एकविंशत्यश्ववारैर्मण्डलं परिकीर्त्तितम् ॥१९॥
नेतृदक्षेक्षणः सर्व्वो व्याममात्रावकाशतः ।
पार्श्वयोः समभागेन मण्डलस्थश्चरेज्जनः ॥२०॥
आपूर्व्वादेश्वरीमाशामधिमोक्तुमथार्हति ।
श्येनिको येन नो लक्ष्यकृतोद्वेगो भवेद्द्वयोः ॥२१॥

श्येना यस्याथ बहवस्तथैव हय-सादिनः ।
सञ्चारयेत् स परितो मण्डलानि पृथक् पृथक् ॥२२॥
ईशमण्डलमध्यस्थः सैनिको हि विनाज्ञया ।
मोक्तुं नार्हति नेदिष्ठे लक्ष्येऽप्यस्खलितस्थितिः ॥२३॥
मण्डले बहरी लेका कुह्यप्येका चिवाजिका ।
वासाद्याः[1] पञ्चषाः शस्ताः क्रमो मोके पुरोदितः ॥२४॥
क्रोशार्द्धाद्धारयेत् स्वीयान् मण्डलान्मण्डलं पृथक् ।
यथा भवेन्न कुह्यादेर्वासादेर्मिश्रणाद्भयम् ॥२५॥
वन्यानान्तु शशादीनां त्रासनाय पुरैव हि ।
त्रिकोषास्त्रासयः कार्य्या धार्य्या वा शक्रयोऽभितः ॥२६॥
बहवः पत्तिणो धार्य्या विनीतैः कालवेदिभिः ।
श्यैनिकस्य प्रभवतः परितः परिचारकैः ॥२७॥
मार्गणे मन्दसञ्चारो मण्डलस्य सदेष्यते ।
निपातानन्तरान्वेषे सुतरां मन्द इष्यते ॥२८॥
सादिनामग्रगा ये च वेत्रिणस्तेऽपि धूतिकाः ।
टोनादीन् सुष्टिमोकेन त्तिपेरन् वर्त्तिकादिषु ॥२९॥
शैघ्र्यादलक्ष्यगतयस्तेऽपि तिर्य्यङ्निपातिषु ।
चीचीकुचीरवोन्नेयग्रहणाद्रसपुष्टिदा ॥३०॥
तद्रसाचिप्तहृदयस्तानेव यदि चेश्वरः ।
प्रक्रीडयेत्तदा तज्ज्ञैर्भाव्यं वेत्रिभिरादरात् ॥३१॥
वेत्रप्रहारानभितः कुर्व्वद्भिर्मन्दचारिणः ।

---

[1] C वासास्तु ।

उत्थापयेयुर्लावादीन् ढौकयेयुश्च तद्गतीः ॥२२॥
यद्येकवारं पतितः पक्षी कुर्य्यान्नचोत्प्लुतिम् ।
सरज्जुना श्रुना तत्र मार्गयित्वा विसर्ज्जयेत् ॥२३॥
सावधानेन देवेन भाव्यमुत्पतते ह्यसौ ।
इत्यादि मधुरालापैर्बोधयेयुस्तथेश्वरम् ॥२४॥
कुह्या मोकः सारसेऽथ क्रौञ्चे रौद्ररसावहः ।
सपक्षयोः पर्व्वतयोरिव यत्रानुधावनम् ॥२५॥
निपत्य नखराक्षेपक्रूरक्रेङ्कारकूजितम् ।
परावृत्त्योग्रचञ्चा च प्रहारो रौद्रसङ्गरः ॥२६॥
अतिदूरगतानान्तु कङ्कदात्यूहपक्षिणाम् ।
लक्ष्ये मोको वहर्य्या हि जनयत्यद्भुतं रसम् ॥२७॥
यत्र वेगानिलस्थानभीषिताः खात्पतन्ति च ।
छिन्नपक्षनगाकाराः खगास्तस्मात् किमद्भुतम् ॥२८॥
हारिणं शिशुमादाय[1] सान्त्राण्यङ्गानि भक्षयन् ।
अनिवार्य्यो हि वीभत्सं चरखो जनयत्यलम् ॥२९॥
टोनादीनां पक्षवेगात् निलीनाः केचुकादयः[2] ।
निरुद्यमाः कुञ्जमध्ये दर्शयन्ति भयानकम् ॥४०॥
अतिलीनो भरद्वाजः पुनरुच्चावचं बहु ।
प्रलपल्लँक्ष्यतामेष्यन् खैरं हासरसायते ॥४१॥
भयार्त्तेषु प्रलीनेषु वाचा लक्ष्येषु तेष्वथ ।
गुलिकास्त्रप्रयोगो हि कर्त्तव्यः कौतुकार्थिना ॥४२॥

१ B शिशुकं गृह्य । २ B फेचुका० ।

दूराल्लक्ष्येषु निपतन् स्थाने ग्रहणमाचरन् ।
परासुकरणे दक्षो वाजी वीररसायते ॥ ४ ३ ॥

ऊर्द्धाक्रान्तिः समाक्रान्तिर्नीचाक्रान्तिरिति त्रिधा ।
वरजग्रहणे प्रोक्ता वाजानां रसभूमयः ॥ ४ ४ ॥
छायाकारं निलीयाधो हठाल्लक्ष्ये तथोर्द्धगे ।
उत्प्लुत्य शरवत्पातमूर्द्धाक्रान्तौ रसावहा ॥ ४ ५ ॥
सममेवानुसरणात् लक्ष्यालक्ष्येण वा पुनः ।
दण्डवत् पतनं लक्ष्ये समाक्रान्तिः समा मता ॥ ४ ६ ॥
नीचानुसारिणि भयादुपरिष्टाच्च वज्रवत् ।
संरम्भात् पतनं लक्ष्ये नीचाक्रान्तिः सुदुष्करा ॥ ४ ७ ॥
एवं लक्ष्यानुसरणात् बहुशः परिधावनात् ।
अतिविस्रम्भणात् वाजा गताः श्रैष्ठ्यं पतत्त्रिषु ॥ ४ ८ ॥
उत्प्लुत्योत्प्लुत्य पतनैः परिग्टह्यावपातनैः ।
मल्ला इव विदग्धानां हरन्ति प्रसभं मनः ॥ ४ ९ ॥

द्वन्द्वसञ्चारिणामेकनिग्रहेऽन्यस्य कूजितम् ।
यत्राभितस्तत्र रसः करुणस्तरुणायते ॥ ५ ० ॥

शृङ्गारः पुष्कलस्तत्र दृश्यते नायके द्विधा ।
लक्ष्यप्राप्तौ भोगरूपस्तदप्राप्तौ तथेतरः ॥ ५ १ ॥
यथावकाशरोमाञ्चहर्षाश्रुस्तम्भगद्गदैः ।
चिन्ताप्रलापवैवर्ण्यभावैः सत्त्वं व्यनक्ति च ॥ ५ २ ॥
स्त्रीसम्भोगादपि रसो मृगव्यायां विशिष्यते ।
येन त्यक्त्वा कुरङ्गाक्ष्याः पतिं सा वशयत्यलम् ॥ ५ ३ ॥

कण्ठलग्नां प्रियां हित्वा हैमनीषु निशाखपि ।
नाभिसारं नराः कुर्य्युर्यदि नेष्टा च सा भवेत् ॥५४॥

अथ वासादिमोकोऽपि शितापशितकादिभिः ।
रभसा विहिताश्लेषः शृङ्गारमनुसञ्जति ॥५५॥

तनूरुहाणि ग्रहणे खात्पतन्ति पतत्रिणाम् ।
जनयन्ति प्रसन्नेन्द्रमुक्तपुष्पोत्करभ्रमम् ॥५६॥

ये विमुक्ता निजे लक्ष्ये दूरे दूरे स्खलन्ति न ।
ते साधुवादपात्राणि शिकारा नेतरे पुनः ॥५७॥

शीघ्रता प्रतिसन्धानं शिकाराणां द्विशस्त्रिशः ।
ग्रहणे तित्तिरादीनां तत् केन प्रतिदिश्यताम् ॥५८॥

जालपादेष्वपि तथा सरसीषु सरःसु च ।
पूर्व्वचारैरनुगतः कुह्यादीन् परिमोचयेत् ॥५९॥

तत्र सम्भूय मोचोऽपि विश्रम्भं ये गता मिथः ।
तेषां प्रशस्यते दिक्षु कवीनां विप्लवाय तु ॥६०॥

दुन्दुभ्यास्ताडनं कार्य्यं वारित्यागाय पक्षिणाम् ।
यथा सुखेन गृह्णीयुः श्येनाः स्वस्थानविच्युतान् ॥६१॥

ये नाट्यबन्धकुशलैर्विततप्रपञ्चैः
सन्दर्शिताः किल रसाः समयं विभज्य ।
एकत्र ते समकमेव रसा अनूना
दृश्यन्त एव कृतिभिर्मृगयाविहारे ॥६२॥

इति श्रीरुद्रदेवविरचिते श्यैनिके शास्त्रे श्येनपातेति-
कर्त्तव्यता परिच्छेदः षष्ठः ।

———

सप्तमः परिच्छेदः ।

एवं विहृत्य परितः श्रान्तो विश्राममर्हति ।
प्रच्छाये कमलामोदमेदुरानिलवीजिते ॥१॥
परावृत्त्य ततः सर्व्वे ये ऽन्ये मण्डलचारिणः ।
तेषां प्रधानपुरुषा नायकोपार्ज्जितञ्च यत् ॥२॥
आखेटे तदुपानीय श्येनादीनां च चेष्टितम् ।
निवेदयेयुरखिलं विनोदाय प्रभोः पुरः ॥३॥
तद्द्वारा श्यैनिकानाञ्च तत्तन्मण्डलचारिणाम् ।
सत्कारादि प्रभुरपि कुर्य्यात् प्रोत्साहवृद्धये ॥४॥
शुक्तपीतान् सुखच्छाये बद्धा श्येनान् तुरङ्गमान् ।
स्वयं विविक्ते सेवेत गात्रसंवाहनक्रियाम् ॥५॥
वल्गुवल्गितहंसानां शृण्वन् स्वनमनुत्तमम् ।
तन्त्रीगीतादि हृदयहारि चैव नयेत् क्षणम् ॥६॥
ततः स्नातोऽनुलिप्तस्य मुक्तास्रग्वसनोज्ज्वलः ।
कृताह्निकः सुकुसुमैर्यथावत्समलङ्कृतः ॥७॥
शुचिहंसोदरचिनीपानकेन हृतक्लमः ।
धतस्तु प्रसन्नात्मा भिषग्भिरनुमोदितः ॥८॥
गरुत्मतोर्म्मिकायुक्तो याङ्गुलीविङ्क्षिपस्वृतः ।
दत्त्वाऽग्निभ्यो वयोभ्यस्य परीक्षार्थं पुरैव हि ॥९॥
तज्ज्ञैरुपाहृतान् भक्ष्यान् साधुशूल्यामिषाणि च ।
कुन्दप्रभाणि भक्तानि भक्षयेदनुयायिभिः ॥१०॥

ताम्बूलाद्युपयुज्याथ शान्ततेजसि भास्वति ।
स्वावासाय समागच्छेत् कथाः कुर्व्वन् पृथग्विधाः ॥११॥

कुह्यामुपकथं क्रौञ्चो धूत्या लावोऽतिगर्व्ववान् ।
नैकधा वाजिना सोऽयं तृणवर्हिर्यथा हतः ॥१२॥

शिकारेणामुना ब्रूमः कथं तित्तिरिनिग्रहः ।
श्येनिकेनामुना मोक्षः सोल्लासस्फूर्ज्जितस्ततः ॥१३॥

तथाधमेनामुना तु तिर्य्यक् क्षिप्तो न चोत्थितः ।
एतस्य पक्षौ न तथा विरोधमुपपद्यते ॥१४॥

इत्याद्यालापयन् वार्त्ताः तत्तत्कर्म्मणि + + + ।
+ + + + + + + ॥१५॥

+ + + + + + + ।
+ + + + + + + ॥१६॥

+ + + + + + + ।
+ + + + + + + ॥१७॥

+ + + + + + + ।
हित्वा पर्व्वाणि मांसञ्च कार्त्तिके कौमुदन्तु वा ॥१८॥

शान्तिपद + + + + प्रहर्षिणा ।
कौमुदे तु विशेषेण + + + ॥१९॥

नराधिपः + + + + ।
+ + + + + + ॥२०॥

वर्ज्जयेत् सर्व्वमांसानि धर्म्माद्यच्च विधीयते ।
मांसन्तु + + + + सर्व्वराजभिः ॥२ ॥

सर्व्वभूतात्मभूतैस्तैः + + परावरैः ।
नाभागेनाम्बरीषेण रामेण च महात्मना ॥२२॥
ऐलेन पृथुना चैव वीरसेनेन चैव हि ।
हर्य्यश्वेन च राजेन्द्र भूपेन भरतेन च ॥२३॥
एतैश्चान्यैश्च राजेन्द्र पुरा मांसं न भक्षितम् ।
शारदे कौमुदपक्षे ततस्ते स्वर्गमाप्नुवन् ॥२४॥
ब्रह्मलोके च तिष्ठन्ति कल्पमानाः स्त्रिया वृताः ।
यथा तत्रैव विहिता मृगयान्यच्च कौमुदात् ॥२५॥
अनिषिद्धात् त्वन्यदा सा तत्रैव परिवर्जयेत् ।
प्रजानां हितकामेन ह्यगस्त्येन महात्मना ॥२६॥
आरण्याः सर्व्वदै[व]त्याः प्रोक्षिताः तामसा मृगाः ॥२७॥
युक्त्या शरदि सेवेत यथाच्छन्दं हिमागमे ।
वसन्ते तु प्रकर्षेण बलारोग्यमभीप्सुभिः ॥२८॥
धनुर्वेदाभ्यासः समविधिरनूनश्च लघुता
गतेर्गात्रोत्साहः तुरगविहृतौ चातिपटुता ।
तथा नीतेर्योगे रसपरिचयश्चाप्यनुपमो
मृगव्यायां चात्रो गुणसमुदयोऽभ्यस्यत इव ॥२९॥

इति श्रीरुद्रदेवविरचिते श्यैनिके शास्त्रे मृगयानन्तरेति-
कर्त्तव्यता परिच्छेदः सप्तमः ।

THE ART OF HAWKING.

CHAPTER I.

I bow to the spirit of Garuḍa, who for the good of the three worlds, is a great friend of Viṣṇu in his wars and a rival of Indra.

2. Is not love experienced by those who are ignorant of the science of Erotics? Still the sages have written on the science for its thorough realization.

3. In the same manner, though the delights of hunting are well known even to men of no intelligence, still hunting affords peculiar delight to the mind of one who knows the science of hawking.

4. Therefore, to heighten that delight, I feel the necessity of writing the science of hunting sometimes in detail and sometimes in brief.

5. Who can fully enumerate all the sports which the Creator of the Universe has designed for the entertainment of the human mind, and for the enjoyment of the fruits of their previous works?

6. Among these, eighteen things are mentioned which are known as *vyasana* (addictions or vices), and without these the senses are useless, and these eighteen are the real causes of exquisite delight.

7. If practised in proper season and within proper bounds, they contribute largely to the delight of all persons, especially of kings.

8. The writers of the Śāstras always deprecate these *vyasanas*, and stories are current of the fall of those who were addicted to them.

9. If women, with languishing eyes beaming with love, are to be altogether avoided, the birth of a son, who delivers his father from the hell named Put, becomes impossible.

10. If hunting is to be altogether prohibited, how can meat, skin, horn and other articles prescribed for sacrifices be obtained?

11. Similarly, by sleeping in the day time, the corporeal body, which is the means for attaining the three great objects of life, is preserved from such diseases as indigestion, and so on.

12. The conclusion, therefore, is that addiction to these vices is to be avoided by all means, because the Lord has said that addiction to these leads to bondage.

13. The avoidance of all sorts of activities leads only to the liberation of the soul. But the performance of the duties prescribed for one's own caste, leads to the attainment of the three other objects of life.

14. That sort of avoidance, however, should be practised with respect to speech and the actions of the body and the mind, which leads to Brahma beyond the reach of speech.

15. If one's merit is so great that one can aim at the attainment of the highest object of desire, one should give up all activities and practise complete renouncement.

16. It is known from the Śāstras that even the enjoyment of the fruits of action causes annihilation of the fruits of activity, as in the case of the wise Saubhari, who enjoyed the objects of his senses for the release from bondage.

17. Moreover, charming couplets are often heard chanted by the Manes for the welfare of Ruci, who was for renouncing the world :—

18. "O darling, man's *karma* accumulated in previous existences, that is, his merits and demerits, wears away

day and night by his 'enjoyments,' that is, his experiences of the joys and sorrows of life.

19. "Therefore you, who know what *dharma* is, will attain peace when your *karma* wears away."

The words of the Lord to Arjuna were also to this effect :—

20. "Therefore go on with your work, for activity is better than inactivity. If you are wanting in activity, you will hardly be able to secure wherewith to keep your body and soul together."

21. In other Śāstras, too, many precepts of wise men are heard which stimulate activity in those who conduct themselves properly in this world.

22. Even a householder, who honestly earns his livelihood, and strives after the knowledge of truth, and honours his guests, and offers oblations to the Manes, and tells the truth, attains liberation.

23. From these and other Vedic precepts, it appears desirable to enjoy the present fruits of previous actions, the enjoyment being, however, without too much attachment.

24 It is known from the Śāstras that King Janaka, who was devoted to the interests of his subjects, attained liberation while enjoying the pleasures of life, and this was so, from his non-attachment to them.

25. There is another way, charming in itself, for the attainment of the highest bliss. Heaven is easily attained by the performance of duties prescribed for one's caste.

26. So one should devote himself to *karma* leading to heaven, to fame, and to longevity. The conclusion of the Vedas is summed up in these words, "Continually doing work, etc."

27. Prosperity is attained by meritorious deeds, and it is desired for the enjoyment of the objects of the senses; that enjoyment again is connected somehow or other with the eighteen kinds of 'vices'.

28. Pure and unmixed enjoyment, unconnected with any of these, is nowhere to be found. The enjoyment of wearing good garlands, anointing with sandal-paste and eating choice food is said to be connected with them.

29. Therefore, the spring season, the rainy season, the moon-rise, sandal-paste and so on, are sources of delight to those only who enjoy the company of their beloved, but are sources of annoyance to those who are separated from their sweethearts.

30. Those who have thoroughly realized the meaning of the Śāstras declare, according to the Āgamas, that wealth is the fruit of the tree of virtue. A good man employs it in charity and in self-enjoyment, and the perfect development of these two is a beautiful result.

Here ends the First Chapter of the Book on Hawking, composed by Rudra Deva, the Rājā of Kūrmácala or Kumāon, entitled "The Importance of Karma."



CHAPTER II.

1. It has been said that there are eighteen addictions, such as rudeness of speech and so on. Their names and their good and bad aspects will now be enumerated.

2, 3. Their names are :—

(1) Rudeness of speech,
(2) Severity of punishment,
(3) Envy,
(4) Disparagement,
(5) Rashness,
(6) Abuse of money,
(7) Fault-finding (the last two through anger),
(8) Anger,
(9) Women,

(10) Gambling,
(11) Wine,
(12) Vocal music,
(13) Dancing,
(14) Instrumental music,
(15) Strolling,
(16) Back-biting,
(17) Sleeping in the day,
(18) Hunting.

These are the outcome of the desire for earthly enjoyments.

4. (1) Rudeness of speech means indecent and abusive utterances. It is good when inflicting punishment and dispensing justice.

5. (2) Severity of punishment means hard sentences on those who do not deserve them. It becomes tolerable in critical times for the sake of prestige. It should not otherwise be resorted to.

6. (3) Envy means intolerance of others' prosperity. It is praiseworthy when it incites to action against rivals or enemies, because inspired by envy, people try to destroy them.

7. (4) Disparagement means be-littling the merits of others and attributing demerits to them. It becomes enjoyable in a party when uttered by jesters and others.

8. In dramas, novels and other compositions it is extensively used, sometimes pithily and sometimes in a verbose and round-about way.

9. (5) Rashness includes any deed in which there is a risk of life. In dangers and difficulties it leads to glory, but on other occasions, it is ridiculous.

10. (6) Abuse of money is (*a*) want of discrimination in accepting and making gifts; (*b*) refusal of legitimate gifts; (*c*) making gifts to undeserving persons; (*d*) ruinous

charity, and (*e*) resumption of charities. This should be practised with caution by trusted emissaries in an enemy's country.

11. (7) Fault-finding is defined as divulgence of other people's faults. This should be carefully heard from spies; and then the course of action determined after deliberation within oneself, and the needful done by trusted emissaries.

12. (8) Anger means crookedness and cruelty in meting out punishment. It should be resorted to in cases of persistent evil-doers and not of others.

13. (9) Wise men speak of that wife as a wife who has auspicious marks and who knows the fine arts, who is clever, who is loved by her husband, and who is young and modest.

14. She is the chief instrument in attaining the three objects of life, and she is *the* distinguishing feature of domestic life. She looks after the children and the utensils and other articles of the household, and she charms the mind.

15. In ancient times, in reply to a question put by Agastya, the god Kumāra said that where the husband and wife are devoted to each other, there the three objects of life flourish.

16. Wealth is obtained by virtue; from wealth emanate desires, and the fulfilment of all desires can be obtained by means of a good wife alone and of nobody else. Therefore, a loving wife is the best fruit of the tree of virtue.

17. Therefore one should by all means try to keep her in good humour by giving up wilfulness in matters relating to carnality.

18. The love which a devoted husband and wife bear to each other is known to themselves alone and cannot be expressed to others. Love is in reality physical touching.

19. In the compositions of Guṇāḍhya, Vyāsa and

Vālmīki, each of which may be compared to a sea full of pearls, this matter has been expatiated upon, both in the case of union and in the case of separation.

20. (10) Gambling is laying a wager in playing with animate or inanimate objects. If well managed it leads to the increase of wealth and desires.

21. (11) Wine is that drinking by which people get intoxicated. It is often highly recommended by physicians in incurable distempers.

22. (12) Vocal music consists of songs by charming voices sung with time and tune in harmony accompanied by dances. Experts only appreciate it.

23. Sung on proper occasions it leads to the attainment of the four objects of life. It is patent to all how it leads to the attainment of wealth and desires.

24. Bharata, Yājñavalkya, Nārada and others speak of the attainment of virtue and liberation, by vocal music. If an expert songster fails to attain the highest bliss by his songs, he at least becomes a follower of Rudra and enjoys delight in his company.

25. (13) Dancing is of two kinds—the wild, called *Tāṇḍava*, and the theatrical, called *Lāsya*. It is accompanied with *chārī* or amorous gait and *laya* or keeping time.

26. (14) In works on music, instrumental music is said to be of four kinds, such as *tata* or stringed instruments, and so forth. The object of dancing and instrumental music is the same as that of vocal music.

27. (15) Roaming in cities and gardens without any definite object is called strolling. It is praiseworthy as it mitigates ennui.

28. (16) Back-biting is evident. It tends to trickery.

29. (17) Sleep by day in all seasons of the year requires no explanation. It is beneficial to children and to persons suffering from dysentery or any wasting disease or from indigestion.

30. These are the seventeen 'addictions,' and hunting is the eighteenth. Their good and bad aspects have thus been described by Bhīṣma to Yudhiṣṭhira :—

31. "O, most liberal in charity, you should give up all sorts of 'addictions,' not that you should not practise them at all, but you should not be given up to them."

32. Thus, after due deliberation of their usefulness or otherwise, each on its own respective merits, they are to be practised within proper bounds for the delight of the world, but too much addiction to them must be avoided.

Here ends the Second Chapter " On the Desirability or otherwise of " *Vyasanas* " in the Book of Hawking, by Rudra Deva.



CHAPTER III.

Now will be given a brief but complete account of *Mṛgayā* or hunting. Though one art, it has infinite varieties, eight of which only are going to be described here.

2. The killing of any animal by whatever means, either for the sake of its flesh or for mere pleasure, is called *Mṛgayā* or hunting.

3. The killing of animals leads to a series of sins. Sacrificial animals are said to be fourteen in number. Some are domestic, others wild.

4. The slaughter of these animals, if not sprinkled over with water for sacrificial purposes, is a sin. On this subject Dvaipāyana uttered the following ślokas in ancient times :—

5. In the interlocution between Pāṇḍu and Kindama on the topic of the slaughter of animals—

" The operations of kings for killing animals are said to be the same as those for killing enemies.

6. 'O, *mṛga!* do not, through ignorance, blame me.' The slaughter of animals may be made with or without stratagem.

7. The sage Agastya, while engaged in a sacrifice, practised hunting in a thick forest, sprinkling with water wild animals and making them sacred to all the gods.

8. Because Agastya sprinkled with water all the beasts of the forest, therefore hunting is no slaughter. In sacrifices, the sprinkling with water of domestic animals, according to prescribed rules, is praiseworthy.

9. Because Agastya sprinkled them with water, the slaughter of wild animals is also praiseworthy. There are reliable records about kings engaging in hunting.

10. If you say it is meaningless to hold that there is pleasure in hunting where on the contrary there is a good deal of fatigue owing to hard exercise and physical pain, my answer is :—

11. Just as forcible kissing and embracing an easily offended girl involves indeed some pain and trouble, but is not without its delight.

12. Just as again in the warfare of love, the scratches by the nails and biting by the teeth is an injury, yet, it leads to pleasure and not to pain, so is the case with hunting.

13. Thus the definition of hunting given above stands. Now will be given an account of its eight subdivisions.

14. Just as a damsel is, like the body of Śiva, capable of exciting the eight emotions in her eight different aspects, so hunting has eight aspects :—

15, 16. (1 Hunting on horseback, (2) by means of snares and nets, (3) by artifice, (4) by the motion of standing corn, (5) by lying in wait, (6) by a close inspection of footprints, (7) by means of dogs, and (8) by means of hawks. These will be treated one by one. Their definitions and the procedure are given below.

17. (1) Hunting on horseback leads to intense delight. In this kind, running animals are killed with arrows and with the help of horses.

18. The ground should be without mud and without stones, without trees, and without pits, the appropriate time being from the middle of the cold season to the middle of *Jyaiṣṭha*.

19, 20, 21. The practice of hunting on horseback reduces fat, lightens the body, enhances strength and ambition, hardens the muscles, kindles appetite, produces a capacity for enduring hunger, thirst, heat, cold, fatigue, and keeping awake at night, generates a skill in aiming at moving objects, increases energy, and produces a faculty of knowing the movements and minds of animals. These and many such excellences are acquired by it for one's own benefit.

22, 23. It leads to the acquisition of religious merit, by killing ferocious animals such as wolves and tigers, by the protection of standing crop, by the slaughter of stags and other animals, by an inspection of the forest, which serves so many useful purposes, by frightening the thieves, and by conciliating forest tribes.

24, 25. It leads to the acquisition of wealth by the capture of wild elephants and rhinoceros, by collecting horns and hides, musk and precious stones, feathers and such like things. By the eating of the wholesome meat of wild boars and buffaloes bagged in hunting, sexual desire and capacity are increased, which leads to the enjoyment of women by the increase of strength.

26, 27, 28. The very life and soul of sexual enjoyment are pride, the self-importance, and pleasure. Therefore for one fatigued with hunting are prescribed, the plaster of sandal paste and other things, the shampooing by the leaf-like soft hands of women, syrups, the five elixirs of life, and fanning with palm-leaves. The sentiment of

self-importance makes the enjoyment of women all the more pleasant after hunting.

29, 30, 31, 32. In the matter of the intensity of pleasure no distinction is found between hunting and the enjoyment of women. The *Śāstrakāras*, however, have shown this minute difference, that in the enjoyment of women pleasure grows less with repetition (which apparently is not the case with hunting). Their causes and effects are equal in respect to the keenness of enjoyment, afforded both in union and in separation (in the case of hunting, in success and in failure). Of these, in respect to women much has been said in dramas and in rhetoric, and also in works on Erotics. Therefore it will not be treated of here. But something should be said in brief about hunting, for the diffusion of its knowledge.

33, 34, 35. The capture of birds from afar by means of hawks, and the sudden hitting by the arrows of bowmen, of moving and stationary objects, produce intense joy, which finds expression in tears, in the hair standing on the end, and in the choking of the voice. If unsuccessful the disappointment is great and it leads to needless apprehension of evil recollections of the past, a change of complexion and lamentation. These and other things happen therefore equally both in hunting and in the love of women. Therefore hunting, too, is desirable for the attainment of the three objects of life.

36, 37, 38. In an open space, with followers spread down-wind and acting in concert, the hunting of animals proves an easy success.

Five or six horsemen are quite enough for hunting rhinoceros. The horses should be quiet and well-trained in their motion. A horseman should strike the rhinoceros with small darts in quick succession on the back.

39, 40. If it turns back, then the horseman relying on the dexterity of his horse should at once run in its front;

others should hit it from behind or skilled archers should pierce it with arrows on the sides.

41. With fleet horses, expert bowmen hit an infuriated lion, sometimes in an open field and sometimes from ambushes, and kill it like a cat.

